| 48. नोचेत् | नहीं तो | यथा समयं विद्यालयं गच्छ, नौचेत् दण्डं प्राप्स्यसि। |
| 49. च | और | रामः सीता च आसने तिष्ठतः। |

# पाठ-8

## उपपद-विभक्तयः

विभक्ति दो प्रकार की होती है 1. कारक विभक्ति 2. उपपद विभक्ति। कारक को सूचित करने वाली विभक्ति को कारक विभक्ति कहते हैं तथा जो पद विशेष अर्थात् प्रति, विना, सह, नमः आदि पदों के योग से जो विभक्ति होती है उसे उपपद विभक्ति कहते हैं। जैसे रामः कलमेन लिखति (राम कलम से लिखता है में 'कलमेन' में करण कारक के अर्थ में तृतीया विभक्ति है। अतः यह कारक विभक्ति है। जब कि 'रामः पुत्रेण सह गच्छति' (राम पुत्र के साथ जाता है) वाक्य में 'पुत्रेण' में तृतीया सह' पद के योग के कारण है अतः यह उपपद विभक्ति है

पदानि द्वितीयाविभक्तिः

(क) (पदों के योग में) उदाहरणानि

उभयतः (दोनों ओर) राजमार्गम् उभयतः वृक्षाः सन्ति

परितः (चारों ओर) ग्राम परितः क्षेत्राणि सन्ति।

धिक् (धिक्कार) अशिक्षितम् धिक।

प्रति (ओर) माता पुत्रं प्रति वदति।

(ख) धातुओं के योग में

याच् (माँगना) निर्धनः धनिकम् धन याचते।

प्रच्छ् (पूछना) छात्रः गुरुम् प्रश्नं पृच्छति।

अधि + शी अधिशेते (सोता है। )

अधि +स्था अधितिष्ठति (बैठता है)

रविः पर्यङ्कम् अधिशेते ( रवि पलंग पर सोता है। )

अधि + आस् अध्यास्ते, नृपः सिंहासनम् अधितिष्ठति/अध्यास्ते। (राजा सिंहासन पर बैठता है)

तृतीया विभक्तिः

पदानि उदाहरणानि

(1) सार्धम्/साकम् सह (साथ) त्वम् मित्रेण 'सार्धमासाकम/सह क्रीडसि।

(2) अलम् (बस) अलम् श्रमेण।

(3) तुल्यः/सदृशाः दानेन तुल्यः / सदृशः निधिः नास्ति।

(4)अ ाविकारार्थकपदयोग पादेन खञ्जः। नेत्राभ्याम् अन्धः। नेत्रेण काणः

(खञ्जः, अन्धः, काणः)

चतुर्थीविभक्तिः

(। ) नमः (नमस्कार) गुरवे नमः। मातभ्यै नमः।

(2) स्वस्ति (कल्याण)        नृपाय स्वस्ति।

धातुयोगे

(1) रुच् (अच्छा लगना)        दिनेशाय रोचते फलाहारः।

(2) क्रुध् (गुस्सा करना)        त्वम् दुष्टाय क्रुध्यसि।

पञ्चमी विभक्तिः

(1) बहिः (बाहर)        ग्रामात् बहिः उद्यानम् अस्ति।

(2) अनन्तरम् (बाद)        उद्यानात् अनन्तर पाठशाला अस्ति।

(3) 'तुलना' अर्थ        अशोक श्यामात् पटुतरः।

(4) 'भय अर्थ        बालः सिंहात् बिभेति।

षष्ठी: विभक्तिः/सप्तमीविभक्तिः

(1) निर्धारण-अर्थे (अनेक में से एक का निश्चय करना)

(2) युधिष्ठिरः पाण्डवानाम्/पाण्डवेषु ज्येष्ठः आसीत् ।

(3) नदीनाम्/नदीषु वा गंगा श्रेष्ठा।

सप्तमी विभक्तिः

(1) 'स्निह्' धातुयोगे (प्यार करना)        माता पुत्रे स्निह्यति।

(2) 'विश्वस्' धातुयोगे.        अहम् त्वयि विश्वसिमि।
(विश्वास करना)

<u>**महत्वपूर्ण प्रश्न**</u> :-
रिक्तस्थानेषु उचितपदैः पूर्ति कुरुत -
1 चन्द्रकेतुः ..... सह प्रविशति । ( सुमन्त्र)
उत्तर -सुमन्त्रेण
2 ...... बहिः उद्यानम् अस्ति। ( गृह )
उत्तर - गृहात्
3 त्वम् ... सह क्रीडसि । ( मित्र)
उत्तर मित्रेण
4 ... ... उभयतः वृक्षाः सन्ति । ( विद्यालय)

उत्तर - विद्यालयम्
5 माता ...... प्रति वदति । ( पुत्र)
उत्तर पुत्रम्
6 सिंहात् ..... प्रकीर्तितम् (एक)
उत्तर - एकम्
7 सर्वतः सारमादधात् ...... इव षट्पदः । ( पुष्प )
उत्तर - पुष्पेभ्यः
8 सर्वप्रथमं का .... बहिः गता। ( शरीर )
उत्तर - शरीरात्
9 छात्राः ........ साफल्यम् प्राप्नुवन्ति । ( परिश्रम)
उत्तर - परिश्रमेण
10 ........ नमः । ( गणेश)
उत्तर - गणेशाय
11 त्वं ....... बहिः आगच्छ । (देवालय)
उत्तर -देवालयात्
12 ईशः ..... सह तिष्ठति। ( तत् ) .
उत्तर - तेन
13 अहे। सत्यममिहिति ........( भवत् )
उत्तर -भवता
14 एषा सा दृश्यते ....... राजधानी पितुर्मय । ( सीता )
उत्तर - सीते
15 सः ..... खल्वाट : अस्ति। ( शिरस्)
उत्तर - शिरसा

# पाठ-9

## शब्द रूप

### देव

| विभक्ति | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथमा | देवः | देवौ | देवाः |
| द्वितीया | देवम् | देवौ | देवान् |
| तृतीया | देवेन | देवाभ्याम् | देवैः |
| चतुर्थी | देवाय | देवाभ्याम् | देवेभ्यः |
| पञ्चमी | देवात् | देवाभ्याम् | देवेभ्यः |
| षष्ठी | देवस्य | देवयोः | देवानाम् |
| सप्तमी | देवे | देवयोः | देवेषु |
| सम्बोधन | हे देव | हे देवौ | हे देवाः |

### बालक

| विभक्ति | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथमा | बालकः | बालकौ | बालकाः |
| द्वितीया | बालकम् | बालकौ | बालकान् |
| तृतीया | बालकेन | बालकाभ्याम् | बालकैः |
| चतुर्थी | बालकाय | बालकाभ्याम् | बालकेभ्यः |
| पञ्चमी | बालकात् | बालकाभ्याम् | बालकेभ्यः |
| षष्ठी | बालकस्य | बालकयोः | बालकानाम् |
| सप्तमी | बालके | बालकयोः | बालकेषु |
| सम्बोधन | हे बालक | हे बालकौ | हे बालकाः |

### राम

| विभक्ति | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथमा | रामः | रामौ | रामाः |
| द्वितीया | रामम् | रामौ | रामाञ् |
| तृतीया | रामेण | रामाभ्याम् | रामैः |

| | | | |
|---|---|---|---|
| चतुर्थी | रामाय | रामाभ्याम् | रामेभ्यः |
| पंचमी | रामात् | रामाभ्याम् | रामेभ्यः |
| षष्ठी | रामस्य | रामयोः | रामाणाम् |
| सप्तमी | रामे | रामयोः | रामेषु |
| सम्बोधन | हे राम! | हे रामौ! | हे रामाः |

**फल**

| विभक्ति | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथमा | फलम् | फले | फलानि |
| द्वितीया | फलम् | फले | फलानि |
| तृतीया | फलेन | फलाभ्याम् | फलैः |
| चतुर्थी | फलाय | फलाभ्याम् | फलेभ्यः |
| पञ्चमी | फलात् | फलाभ्याम् | फलेभ्यः |
| षष्ठी | फलस्य | फलयोः | फलानाम् |
| सप्तमी | फले | फलयोः | फलेषु |
| सम्बोधन | हे फल! | हे फले! | हे फलानि |

## लता

| विभक्ति | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथमा | लता | लते | लताः |
| द्वितीया | लताम् | लते | लताः |
| तृतीया | लतया | लताभ्याम् | लताभिः |
| चतुर्थी | लतायै | लताभ्याम् | लताभ्यः |
| पञ्चमी | लतायाः | लताभ्याम् | लताभ्यः |
| षष्ठी | लतायाः | लतयोः | लतानाम् |
| सप्तमी | लतायाम् | लतयोः | लतासु |
| सम्बोधन | हे लते! | हे लते! | हे लताः |

## रमा

| विभक्ति | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथमा | रमा | रमे | रमाः |
| द्वितीया | रमाम् | रमे | रमाः |
| तृतीया | रमया | रमाभ्याम् | रमाभिः |
| चतुर्थी | रमायै | रमाभ्याम् | रमाभ्यः |
| पंचमी | रमायाः | रमाभ्याम् | रमाभ्यः |
| षष्ठी | रमायाः | रमयोः | रमाणाम् |
| सप्तमी | रमायाम् | रमयोः | रमासु |
| सम्बोधन | हे रमे! | हे रमे! | हे रमाः |

## बाला

| विभक्ति | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथमा | बाला | बाले | बालाः |
| द्वितीया | बालाम् | बाले | बालाः |
| तृतीया | बालया | बालाभ्याम् | बालाभिः |
| चतुर्थी | बालायै | बालाभ्याम् | बालाभ्यः |
| पंचमी | बालायाः | बालाभ्याम् | बालाभ्यः |
| षष्ठी | बालायाः | बालयोः | बालानाम् |
| सप्तमी | बालायाम् | बालयोः | बालासु |
| सम्बोधन | हे बाले! | हे बाले! | हे बालाः |

## हरि

| विभक्ति | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथमा | हरिः | हरी | हरयः |
| द्वितीया | हरिम् | हरी | हरीन् |
| तृतीया | हरिणा | हरिभ्याम् | हरिभिः |

| | | | |
|---|---|---|---|
| चतुर्थी | हरये | हरिभ्याम् | हरिभ्यः |
| पंचमी | हरेः | हरिभ्याम् | हरिभ्यः |
| षष्ठी | हरेः | हर्योः | हरीणां |
| सप्तमी | हरौ | हर्योः | हरिषु |
| सम्बोधन | हे हरे! | हे हरी! | हे हरयः |

## मति

| विभक्ति | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथमा | मतिः | मती | मतयः |
| द्वितीया | मतिम् | मती | मतीः |
| तृतीया | मत्या | मतिभ्याम् | मतिभिः |
| चतुर्थी | मत्यै, मतये | मतिभ्याम् | मतिभ्यः |
| पञ्चमी | मत्याः, मतेः | मतिभ्याम् | मतिभ्यः |
| षष्ठी | मत्याः, मतेः | मत्योः | मतीनाम् |
| सप्तमी | मत्याम्, मतौ | मत्योः | मतिषु |
| सम्बोधन | हे मते! | हे मती! | हे मतय |

## नदी

| विभक्ति | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथमा | नदी | नद्यौ | नद्यः |
| द्वितीया | नदीम् | नद्यौ | नदीः |
| तृतीया | नद्या | नदीभ्याम् | नदीभिः |
| चतुर्थी | नद्यै | नदीभ्याम् | नदीभ्यः |
| पञ्चमी | नद्याः | नदीभ्याम् | नदीभ्यः |
| षष्ठी | नद्याः | नद्योः | नदीनाम् |
| सप्तमी | नद्याम् | नद्योः | नदीषु |
| सम्बोधन | हे नदि! | हे नद्यौ ! | हे नद्यः |

## साधु

| विभक्ति | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथमा | साधुः | साधू | साधवः |
| द्वितीया | साधुम् | साधू | साधून् |
| तृतीया | साधुना | साधुभ्याम् | साधुभिः |
| चतुर्थी | साधवे | साधुभ्याम् | साधुभ्यः |
| पञ्चमी | साधोः | साधुभ्याम् | साधुभ्यः |
| षष्ठी | साधोः | साध्वोः | साधूनाम् |
| सप्तमी | साधौ | साध्वोः | साधुषु |
| सम्बोधन | हे साधो! | हे साधू ! | हे साधवः |

## धेनु

| बिभक्ति | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथमा | धेनु: | धेनू | धेनव: |
| द्वितीया | धेनुम् | धेनू | धेनू: |
| तृतीया | धेन्वा | धेनुभ्याम् | धेनुभि: |
| चतुर्थी | धेनवे | धेनुभ्याम् | धेनुभ्य: |
| पंचमी | धेनो: | धेनुभ्याम् | धेनुभ्य: |
| षष्ठी | धेनो: | धेन्वो: | धेनूनाम् |
| सप्तमी | धेनौ | धेन्वो: | धेनुषु |
| संबोधन | हे धेनो | हे धेनू | हे धेनव |

## मातृ

| विभक्ति | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथमा | माता | मातरौ | मातरः |
| द्वितीया | मातरम् | मातरी | मातृः |
| तृतीया | मात्रा | मातृभ्याम् | मातृभिः |
| चतुर्थी | मात्रे | मातृभ्याम् | मातृभ्यः |

| | | | |
|---|---|---|---|
| पञ्चमी | मातुः | मातृभ्याम् | मातृभ्यः |
| षष्ठी | मातुः | मात्रोः | मातृणाम् |
| सप्तमी | मातरि | मात्रोः | मातृषु |
| सम्बोधन | हे मातः! | हे मातरौ! | हे मातर |

# पितृ

| विभक्ति | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथमा | पिता | पितरौ | पितर: |
| द्वितीया | पितरम् | पितरौ | पितृन् |
| तृतीया | पित्रा | पितृभ्याम् | पितृभि: |
| चतुर्थी | पित्रे | पितृभ्याम् | पितृभ्य: |
| पंचमी | पितु: | पितृभ्याम् | पितृभ्य: |
| षष्ठी | पितु: | पित्रो: | पितृणाम् |
| सप्तमी | पितरि | पित्रो: | पितृषु |
| सम्बोधन | हे पित: ! | हे पितरौ ! | हे पितर: |

# अस्मद्

| विभक्ति | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथमा | अहम् | आवाम् | वयम् |
| द्वितीया | माम् | आवाम् | अस्मान् |
| तृतीया | मया | आवाभ्याम् | अस्माभि: |
| चतुर्थी | मह्यं | आवाभ्याम् | अस्मभ्य: |
| पंचमी | मत् | आवाभ्याम् | अस्मभ्य: |
| षष्ठी | मम | आवयो: | अस्माकम् |
| सप्तमी | मयि | आवयो: | अस्माषु |

## युष्मद्

| विभक्ति | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथमा | त्वम् | युवाम् | यूयम् |
| द्वितीया | त्वाम् | युवाम् | युष्मान् |
| तृतीया | त्वाय | युवाभ्याम् | युस्माभिः |
| चतुर्थी | तुभ्यं | युवाभ्याम् | युष्मभ्यम् |
| पंचमी | त्वत् | युवाभ्याम् | युष्मत् |
| षष्ठी | तव | युवयोः | युष्माकम् |
| सप्तमी | त्वयि | युवयोः | युष्मासु |

## किम् (तीनो लिंगो में )

| विभक्ति | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथमा | का | के | काः |
| द्वितीया | काम् | के | काः |
| तृतीया | कया | काभ्याम् | काभिः |
| चतुर्थी | कस्यै | काभ्याम् | काभ्यः |
| पंचमी | कस्याः | काभ्याम् | काभ्यः |
| षष्ठी | कस्याः | कयोः | कासाम् |
| सप्तमी | कस्याम् | कयोः | कास |

## तद्(तीनो लिंगो में)

| **विभक्ति** | **एकवचन** | **द्विवचन** | **बहुवचन** |
|---|---|---|---|
| प्रथमा | सः | तौ | ते |
| द्वितीया | तम् | तौ | तान् |
| तृतीया | तेन | ताभ्याम् | तैः |
| चर्तुथी | तस्मै | ताभ्याम् | तेभ्यः |
| पन्चमी | तस्मात् | ताभ्याम् | तेभ्यः |
| षष्ठी | तस्य | तयोः | तेषाम् |
| सप्तमी | तस्मिन् | तयोः | तेष |

**अभ्यास प्रश्नाः-**

रेखांकित पदयोःकः मूलशब्दः का च विभक्तिः ?

1 **माता गुरुतरा भूमेः** ।

उत्तर - मातृ मूलशब्द प्रथमा विभक्ति

भूमि मूलशब्द पंचमी / षष्ठी विभक्ति

2 **कः शत्रुदुर्जयः पुंसाम्** ।

उत्तर - किम् मूलशब्द प्रथमा विभक्ति

3. राजलक्ष्मीः **शशिनः प्रभेव अधिकम् अराजत।**

उत्तर - शशि मूलशब्द द्वितिया विभक्ति

4. **वायोः शीघ्रतरं मनः** ।

उत्तर -वात् मूलशब्द षष्ठी विभक्ति

5 **साधु : सर्वभूतहित : भवति** ।

उत्तर - साधु मूलशब्द प्रथमा विभक्ति

6. कथं **यूयं मया विना अजीवत ?**

उत्तर -युष्मद् मूलशब्द प्रथमा विभक्ति

7 **मम अपि अभीष्टमेतत्** ।

उत्तर -अस्मद् मूलशब्द षष्ठी विभक्ति

8. अहो सत्ययभिहितम् **भवता**।

उत्तर -भवत् मूलशब्द तृतीया विभक्ति

9. **मित्रस्य चक्षुषा मां सर्वाणि भूतानि समीक्षन्ताम्** ।

उत्तर -मित्र मूलशब्द षष्ठी विभक्ति

सर्व मूलशब्द प्रथमा विभक्ति

10 **वायोः अधिकं गतिशीलम् किमस्ति** ।

उत्तर -वात् मूलशब्द षष्ठी विभक्ति

11 **विदुषोः अस्माकम्**

उत्तर - विद्वस् मूलशब्द सप्तमी विभक्ति

अस्मद् मूलशब्द पंचमी विभक्ति

12 वाङ् मयं **तप उच्यते** ।

उत्तर - तप मूलशब्द प्रथमा विभक्ति

13 अशक्तैः **बलिनः शत्रोः कर्त्तव्यम् प्रपलायनम्** ।

उत्तर -बलि मूलशब्द प्रथमा विभक्ति

14 अहो बहुमत्स्योड्यं **ह्रद :** ।

उत्तर - ह्रद मूलशब्द पंचमी / षष्ठी विभक्ति ।

15 जनाः **मनसा ध्यायन्ति कुर्वन्ति।**

उत्तर - मन मूलशब्द तृतीया विभक्ति ।

# पाठ -10

# धातु

## भू ( होना )

लट् लकार ( वर्तमान काल )

| पुरुष | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथम पुरुष | भवति | भवत: | भवन्ति |
| मध्यम पुरुष | भवसि | भवथ: | भवथ |
| उत्तम पुरुष | भवामि | भवाव: | भवाम: |

लङ् लकार ( भूतकाल )

| पुरुष | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथम पुरुष | अभवत् | अभवताम् | अभवन् |
| मध्यम पुरुष | अभव: | अभवतम् | अभवत |
| उत्तम पुरुष | अभवम् | अभवाव | अभवाम |

लृट लकार ( भविष्यत काल )

| पुरुष | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथम पुरुष | भविष्यति | भविष्यत: | भविष्यन्ति |
| मध्यम पुरुष | भविष्यसि | भविष्यथ: | भविष्यथ |
| उत्तम पुरुष | भविष्यामि | भविष्याव : | भविष्याम: |

लोट लकार (आज्ञा के अर्थ में )

| पुरुष | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथम पुरुष | भवतु | भवताम् | भवन्तु |
| मध्यम पुरुष | भव | भवतम् | भवत |
| उत्तम पुरुष | भवानि | भवाव | भवाम |

विधिलिङ् लकार ( चाहिए के अर्थ में )

| पुरुष | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथम पुरुष | भवेत् | भवेताम् | भवेयु: |
| मध्यम पुरुष | भवे: | भवेतम् | भवेत |
| उत्तम पुरुष | भवेयम् | भवेव | भवेम |

# कृ धातु

लट् लकार (वर्तमानकाल)

| पुरुष | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथम पुरुष | करोति | कुरुतः | कुर्वन्ति |
| मध्यम पुरुष | करोषि | कुरुथः | कुरुथ |
| उत्तम पुरुष | करोमि | कुर्वः | कुर्मः |

लृट् लकार (सामान्य भविष्यत्काल)

| पुरुष | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथम पुरुष | करिष्यति | करिष्यतः | करिष्यन्ति |
| मध्यम पुरुष | करिष्यसि | करिष्यथः | करिष्यथ |
| उत्तम पुरुष | करिष्यामि | करिष्यावः | करिष्याम |

लङ् लकार (अनद्यतन भूतकाल)

| पुरुष | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथम पुरुष | अकरोत् | अकुरुताम् | अकुर्वन् |
| मध्यम पुरुष | अकरोः | अकुरुतम् | अकुरुत |
| उत्तम पुरुष | अकरवम् | अकुर्व | अकुर्म |

लोट् लकार (आदेशवाचक)

| पुरुष | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथम पुरुष | करोतु | कुरुताम् | कुर्वन्तु |
| मध्यम पुरुष | कुरु | कुरुतम् | कुरुत |
| उत्तम पुरुष | करवाणि | करवाव | करवा |

विधिलिङ् लकार (अनुज्ञावाचक)

| पुरुष | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथम पुरुष | कुर्यात् | कुर्याताम् | कुर्युः |
| मध्यम पुरुष | कुर्याः | कुर्यातम् | कुर्यात |
| उत्तम पुरुष | कुर्याम् | कुर्या | कुर्याम |

# अस्

लट् लकार (वर्तमानकाल)

| पुरुष | एकवचन | द्विवचन | बहुक्चन |
|---|---|---|---|
| प्रथम पुरुष | अस्ति | स्त: | सन्ति |
| मध्यम पुरुष | असि | स्थ: | स्थ |
| उत्तम पुरुष | अस्मि | स्व: | स्म: |

लङ् लकार ( भूतकाल )

| पुरूष | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथम पुरूष | आसीत् | आस्ताम् | आसन् |
| मध्यम पुरूष | आसी: | आस्तम् | आस्त |
| उत्तम पुरूष | आसम् | आस्व | आस्म: |

लृट् लकार ( भविष्यत काल )

| पुरूष | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथम पुरूष | भविष्यति | भविष्यत: | भविष्यन्ति |
| मध्यम पुरूष | भविष्यसि | भविष्यस्थ: | भविष्यथ |
| उत्तम पुरूष | भविष्यामि | भविष्याव: | भविष्याम |

लोट् लकार (आज्ञा के अर्थ में )

| पुरूष | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथम पुरूष | अस्तु | स्ताम् | सन्तु |
| मध्यम पुरूष | एधि ,स्ताम् | स्तम् | स्त |
| उत्तम पुरूष | असानि | असाव | असाम |

विधिलिङ् लकार (चाहिए के अर्थ में)

| पुरूष | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथम पुरुष | स्यात् | स्याताम् | स्यु: |
| मध्यम पुरूष | स्या: | स्यातम् | स्यात |
| उत्तम पुरूष | स्याम् | स्याव | स्याम |

# गम्

लट् लकार (वर्तमानकाल)

| पुरुष | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथम पुरुष | गच्छति | गच्छतः | गच्छन्ति |
| मध्यम पुरुष | गच्छसि | गच्छथः | गच्छथ |
| उत्तम पुरुष | गच्छामि | गच्छावः | गच्छामः |

लृट  लकार (सामान्य भविष्यत्काल)

| पुरुष | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथम पुरुष | गमिष्यति | गमिष्यतः | गमिष्यन्ति |
| मध्यम पुरुष | गमिष्यसि | गमिष्यथः | गमिष्यथ |
| उत्तम पुरुष। | गमिष्यामि | गमिष्यावः | गमिष्यामः |

लङ् लकार (अनद्यतन भूतकाल)

| पुरुष | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथम पुरुष | अगच्छत् | अगच्छताम् | अगच्छन् |
| मध्यम पुरुष | अगच्छः | अगच्छतम् | अगच्छत |
| उत्तम पुरुष | अगच्छम् | अगच्छाव: | अगच्छाम: |

लोट् लकार (आदेशवाचक)

| पुरुष | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथम पुरुष | गच्छतु | गच्छताम् | गच्छन्तु |
| मध्यम पुरुष | गच्छ | गच्छतम् | गच्छत |
| उत्तम पुरुष | गच्छानि | गच्छाव | गच्छाम |

विधिलिङ् लकार (अनुज्ञावाचक)

| पुरुष | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथम पुरुष | गच्छेत् | गच्छेताम् | गच्छेयुः |
| मध्यम पुरुष | गच्छेः | गच्छेतम् | गच्छेत |
| उत्तम पुरुष | गच्छेयम् | गच्छेव | गच्छेम |

# पिब्

लट् लकार

| पुरुष | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथम पुरुष | पिबति | पिबतः | पिबन्ति |
| मध्यम पुरुष | पिबसि | पिबथः | पिबथ |
| उत्तम पुरुष | पिबामि | पिबावः | पिबामः |

लृट् लकार

| पुरुष | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथम पुरुष | पास्यति | पास्यत: | पास्यन्ति |
| मध्यम पुरुष | पास्यसि | पास्यथ: | पास्यथ |
| उत्तम पुरुष | पास्यामि | पास्याव: | पास्याम: |

लङ् लकार

| पुरुष | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथम पुरुष | अपिबत् | अपिबताम् | अपिबन् |
| मध्यम पुरुष | अपिबः | अपिबतम् | अपिबत |
| उत्तम पुरुष | अपिबम् | अपिबाव | अपिबाम |

लोट् लकार

| पुरुष | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथम पुरुष | पिबतु | पिबताम् | पिबन्तु |
| मध्यम पुरुष | पिब | पिबतम् | पिबत |
| उत्तम पुरुष | पिबानि | पिबाव | पिबाम |

विधिलिङ् लकार

| पुरुष | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथम पुरुष | पिबेत् | पिबेताम् | पिबेयुः |
| मध्यम पुरुष | पिबेः | पिबेतम् | पिबेत |
| उत्तम पुरुष | पिबेयम् | पिबेव | पिबेम |

# सेव्

लट् लकार

| पुरुष | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथम पुरुष | सेवते | सेवेते | सेवन्ते |
| मध्यम पुरुष | सेवसे | सेवेथे | सेवध्वे |
| उत्तम पुरुष | सेवे | सेवावहे | सेवामहे |

लृट् लकार

| पुरुष | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथम पुरुष | सेविष्यते | सेविष्येते | सेविष्यन्ते |
| मध्यम पुरुष | सेविष्यसे | सेविष्येथे | सेविष्यध्वे |
| उत्तम पुरुष | सेविष्ये | सेविष्यावहे | सेविष्यामहे |

लङ् लकार

| पुरुष | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथम पुरुष | असेवत | असेवेताम् | असेवन्त |
| मध्यम पुरुष | असेवथाः | असेवेथाम् | असेवध्वम् |
| उत्तम पुरुष | असेवे | असेवावहि | असेवामहि |

लोट् लकार

| पुरुष | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथम पुरुष | सेवताम् | सेवेताम् | सेवन्ताम् |
| मध्यम पुरुष | सेवस्व | सेवेथाम् | सेवध्वम् |
| उत्तम पुरुष | सेवै | सेवावहै | सेवामहै |

विधिलिङ् लकार

| पुरुष | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथम पुरुष | सेवेत | सेवेयाताम् | सेवेरन् |
| मध्यम पुरुष | सेवेथाः | सेतेयाथाम् | सेवेघ्वम् |
| उत्तम पुरुष | सेवेय | सेवेवाहि | सेवेमहि |

# लभ्

लट् लकार

| पुरुष | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथम पुरुष | लभते | लभेते | लभन्ते |
| मध्यम पुरुष | लभसे | लभेथे | लभध्वे |
| उत्तम पुरुष | लभे | लभावहे | लभामहे |

लृट् लकार

| पुरुष | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथम पुरुष | लप्स्यते | लप्स्येते | लप्स्येन्ते |
| मध्यम पुरुष | लप्स्यसे | लप्स्येथे | लप्स्यध्वे |
| उत्तम पुरुष | लप्स्ये | लप्स्यावहे | लप्स्यामहे |

लङ् लकार

| पुरुष | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथम पुरुष | अलभत | अलभेताम् | अलभन्त |
| मध्यम पुरुष | अलभथाः | अलभेथाम् | अलभध्वम् |
| उत्तम पुरुष | अलभे | अलभावहि | अलभामहि |

लोट् लकार

| पुरुष | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथम पुरुष | लभताम् | लभेताम् | लभन्ताम् |
| मध्यम पुरुष | लभस्व | लभेथाम् | लभध्वम् |
| उत्तम पुरुष | लभै | लभावहै | लभामहै |

विधिलिङ् लकार

| पुरुष | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथम पुरुष | लभेत | लभेयाताम् | लभेरन् |
| मध्यम पुरुष | लभेथाः | लभेयाथाम् | लभेध्वम् |
| उत्तम पुरुष | लभेय | लभेवहि | लभेमहि |

# अभ्यासप्रश्नोत्तर:-

रेखांकित पदयोः कः धातुः कश्चलकार: ?

1. त्यज जपमाला

उत्तर - त्यज् धातु लोट लकार

2 सलीलमीश: सृजति भुवम् ।

उत्तर - सृज् धातु लट्लकार

3 बोपदेवः व्याकरणम अरचयत्।

उत्तर - रच् धातु लङ्गलकार

4. सुरक्षितं देवेहत विनश्यति।

उत्तर - नश् धातु लट्लकार

5 हन्त! प्रतिनिवर्तन्ते अस्माकं सैनिकाः ।

उत्तर - वर्त धातु लट्लकार

6 जलं रक्षित रक्षितम ।

उत्तर -रक्ष् धातु लट्लकार

7वाचं वदत भद्रया ।

उत्तर - वद् धातु लोट्लकार

8 स्वस्ति पन्थामनुचरेम ।

उत्तर - चर् धातु विधिलिङ् लकार

9 का वा क्षत्तिरिह तेन भवेत् ते।

उत्तर - भूधातु विधिलिङ् लकार

10 प्रभाते आगत्य मत्स्यसंक्षयम् करिष्यामः ।

उत्तर - कृधातु लट्लकार

11 ताः मे सन्तु सदा गृहे ।

उत्तर - अस् धातु लोट्लकार

12वृक्षः स्वयमातपे तिष्ठति।

उत्तर स्था धातु लट्लकार

13 ब्राह्मे मुहुर्ते उत्तिष्ठेत् ।

उत्तर स्था धातु विधिलिङ् लकार

14 लीलावती भास्कराचार्यस्य पुत्री आसीत्।

उत्तर - अस् धातु लङ् लकार

15 चत्वारि तस्य वर्धन्ते ।

उत्तर - वर्धधातु लट्लकार

# <u>रचनाकौशल।</u>

## 1.संस्कृत अपठितावबोधनम् अपठित गद्यांशः

**1.संस्कृतभाषायां कथासाहित्यं तु महता प्रभाषेन दृश्यते। पञ्चतन्त्रं, हितोपदेशः, बृहत्कथा, सिंहासनद्वात्रिंशिका, कथासरित्सागरः इत्यादिषु रामायण महाभारत पुराणादिषु च विस्तृतः कथाप्रवाहः दृश्यते। बौद्धधर्मे अपि जातककथादयः सुप्रसिद्धाः। लौकिकविषयम् अवलम्ब्य रचिताः जैन कथाः अपि अनेकाः सन्ति। नीतिप्रवणता, आध्यात्मिकी प्रगतिः, आत्मोन्नतिः इत्यादयः अंशाः एतासु कथासु प्राधान्यम् आवहन्ति। एतासु कथासु निबद्धाः श्लोकाः कथामाध्यमेन जीवननिर्माणस्य सन्देशं प्रयच्छन्ति। एष एव उपदेशः एतासां कथानाम् उद्देश्यम्।**

प्रश्ना:

(1) विस्तृत: कथाप्रवाह: कस्मिन् महाकाव्ये दृश्यते ?

(2)जातककथाः कस्मिन् धर्मे सुप्रसिद्धाः?

(3) कथासु निबद्धा: श्लोका: कस्य सन्देशं प्रयच्छन्ति ?

(5) 'प्रभाषेन' इति पदस्य विशेषणं किम् ?

(5) 'संक्षिप्तः' इति पदस्य किं विलोमपदमत्र प्रयुक्तम्?

उत्तर

1- संस्कृतभाषायां

2- बौद्धधर्मे

3- जीवननिर्माणस्य

4- महता

5- विस्तृत:

**2. हिमालय पर्वते अनेकानि दर्शनीय स्थानानि सन्ति। तत्र प्रतिवर्षं भक्ताः श्रद्धालवश्च गत्या बद्रीनाथ-केदारनाथादिषु**

**मंदिरेषु भगवद्दर्शनं कुर्वन्ति। अद्यापि अनेकासु गुहासुमुनयः उषित्वातपः तपन्ति। अतः हिमालयस्य महत् गौरवं वर्तते। कस्य रक्षणे एव भारतस्य रक्षास्ति। वयं प्रतिज्ञा कुर्मः यत् आवश्यकतायां सत्याम् अस्य रक्षार्थं प्राणान् अपि त्यक्ष्यामः।**

प्रश्ना:

(1) अनेकानि दर्शनीयानि स्थानानिकस्मिन् पर्वते सन्ति ?

(2) भक्ताः कुत्र गत्वा भगवद्दर्शनं कुर्वन्ति

(3) मुनयः कुत्र उषित्वा तपः कुर्वन्ति?

(4) कस्य रक्षणे एव भारतस्य रक्षास्ति?

(5) 'प्राणान्' इति शब्दे का विभक्ति: ?

**उत्तर**

1- हिमालय

2- बद्रीनाथ-केदारनाथादिषु मंदिरेषु

3-गुहासु

4-हिमालयस्य

5- द्वितीया विभक्ति

**3.दीपावलीपर्व भारतीयानाम् प्रमुखं पर्व विद्येत। अस्मिन् दिवसे श्रीरामः पितुः आज्ञा पालयन् चतुर्दशवर्षाणि वने उषित्वा रावणं हत्वा, स्वपत्नीं सीतां च विमोच्य अयोध्यानगरी परावृत्तः आसीत् । तस्मादेव कालात् भारतीयाः प्रतिवर्ष कार्तिक अमावास्यायां स्वगृहे षु दीपान् प्रज्वालयन्ति । अस्मिन्नेव दिवसे रात्रौ महालक्ष्मीपूजनं क्रियते । अस्मात् पर्वणः पूर्वं जनाः स्वगृहाणां शुद्धिं कुर्वन्ति, गृहाणि च सज्जयन्ति ।**

प्रश्ना :

(1) दीपावल्यां रात्रौ किं क्रियते ?

(2) दीपावली केषां प्रमुखं पर्व अस्ति ?

(3) दीपावली कस्मिन् दिने भवति ?

(4) 'पर्वणः' इति पदे का विभक्तिः ?

(5) 'स्वपत्नी सीता' अनयोः पदयों विशेषणपदं किम् ?

उत्तर

1- महालक्ष्मीपूजनं

2- भारतीयानाम्

3- प्रतिवर्ष कार्तिक अमावास्यायां

4- पंचमी

5- 'स्वपत्नीम्

**4.मिथिलायां विद्यापति नामकः महान् कविः वभूव। सः संस्कृतस्य मैथिलीभाषायाश्च महाकविः आसीत्। अवहट्ट भाषायाम् अपितेन रचनाः कृताः। सः राज्ञः शिवसिंहस्य मित्रम् आसीत्। नृपस्य राजसभायां सः राजकविः आसीत्। विद्यापतिः महान् शिवभक्तः आसीत्। कथ्यते यत् महादेवः तस्य भक्त्या प्रसन्नो भूत्वा तस्मैबदु वरान् अयच्छत्।**

प्रश्ना :

(1) विद्यापतिः कस्याः भाषायाः कविः आसीत् ?

(2)सः कस्य नृपस्य मित्रम् आसीत् ?

(3) विद्यापतिः कस्य भक्तः आसीत् ?

(4) विद्यापतये कः वरान् अयच्छत् ?

(5)'रुष्टः' इति पदस्य किं विलोमपदमत्र प्रयुक्तम्?

उत्तर

1- संस्कृतस्य

2- शिवसिंहस्य

3- शिवभक्तः

4- महादेवः तस्य भक्त्या प्रसन्नो भूत्वा तस्मैबदु वरान् अयच्छत्।

5- प्रसन्नः

**5.जन्मभूमिः अस्मान् जननीवत् संरक्षति । अस्याः अन्नेन, जलेन, फलादीनां रसैश्च अस्माकं परिपालनं भवति कर्पासेन निर्मितैः वस्त्रैः अस्माकं शरीरं सुरक्षितं भवति । अस्मिन्नेव धरातले गृहाणि निर्माय वयं ससुखं वसामः । इयं जन्मभूमिः मातुरप्यधिकम् उपकरोति । एषा यावज्जीवं पालयति पोषयति च । भारतवर्षम् अस्माकं मातृभूमिः जन्मभूमिश्च । इयम् अस्माभिः अहर्निशं पूजनीया, रक्षणीया, वन्दनीया च अस्याः सौन्दर्यं तु अद्भुतम् एव । नदीभिः इयं सुजला । शस्यश्यामला च । देवताः अपि अस्याः गीतानि गायन्ति ।**

प्रश्नाः -

(1) अस्माकं शरीरं केन निर्मितैः वस्त्रैः सुरक्षितं भवति ?

(2) वयं कुत्र गृहाणां निर्माणं कुर्मः ?

(3) काः अस्याः गीतानि गायन्ति ?

(4) 'संरक्षति' इति क्रियापदस्य कर्तृपदं किम् ?

(5) 'इयम् अस्माभिः अहर्निशं पूजनीया' इति वाक्ये 'इयम्' सर्वनामपदं कस्यै प्रयुक्तम् ?

उत्तर

1- कर्पासेन निर्मितैः

2- अस्मिन्नेव धरातले

3- देवताः अपि

4- जन्मभूमिः

5- जन्मभूमिः

**6.भारतस्य शक्तिः सामर्थ्यं च अत्रत्यं प्राचीनज्ञानम् अवलम्बते। ज्ञानस्य भण्डारं संस्कृते निहितम् । ज्ञानस्य प्रकाशः अस्ति इत्यतः अयं देशः निर्दिश्यते 'भारतम्' इति। 'भा' नाम प्रकाशः । भायां रतः इति कारणतः अयं देशः भारतम्। ज्ञानस्य आधारेण एव भारतं भारतं भवितुम् अर्हति। भारतस्य पुनरुज्जीवनपर्यन्तम् अग्रे सरणमेव अस्माकं लक्ष्यम् इति। वयं सर्वे मिलित्वा संस्कृतभाषायाः प्रचाराय प्रसाराय कार्यं कुर्याम । पाठयेम संस्कृतं जगति सर्वमानवान् इति भवेत् अस्माकं प्रमुखं लक्ष्यम्। एषः एव भवेत् अस्माकं सङ्कल्पः । तदर्थं वयं स्वकीयस्य ज्ञानमपि अहर्निशं वर्धयामः इत्येव भवेत् अस्माकं निश्चयः ।**

प्रश्ना :

(1)अयं देशः 'भारतम्' इति कथम् उच्यते ?

(2) वयं सर्वे मिलित्वा किं किं कार्यं कुर्याम ?

(3) अस्माकं निश्चयः किं भवेत् ?

(4) 'अर्हति' इति क्रियापदस्य कर्तृपदं किम् ?

(5) 'प्रमुखम्' इति विशेषणस्य विशेष्यं किम् ?

उत्तर

1- ज्ञानस्य प्रकाशः अस्ति इत्यतः अयं देशः निर्दिश्यते 'भारतम्' इति।

2- वयं सर्वे मिलित्वा संस्कृतभाषायाः प्रचाराय प्रसाराय कार्यं कुर्याम।

3- पाठयेम संस्कृतं जगति सर्वमानवान् इति भवेत् अस्माकं प्रमुखं लक्ष्यम्।

4- भारत

5- अस्माकं

**7 अवश्यं करणीयं कर्म कर्तव्यम् इति उच्यते। मनुष्याणां जीवने कर्तव्यपालनेनैव सर्वदा उन्नतिर्भवति। कर्तव्यपालनं जीवनस्याधारशिला विद्यते। सर्वे एव स्वकर्तव्यस्याचरणं कुर्वन्ति। सूर्यः सततं तपति। वायुः अहर्निशं वहति । धरा प्राणिनः धारयति। जीवनं सुखमयं कर्तुं मानवस्य कृते अनेकानि कर्तव्यानि निर्धारितानि सन्ति। मनुष्यैः तेषां पालनं अवश्यमेव कर्तव्यम्। विद्याध्ययनम्, चरित्र-निर्माणम, स्वदेशस्य समाजस्य च सेवा सदाचारस्य पालनम, परोपकारादयः सर्वाणि कर्तव्यानि सन्ति। यः मानवः कर्तव्यपरायणः भवति स एव समाजस्य रक्षकः आदरभूतश्च भवति। अतः सर्वैः मनुष्यैः सदा स्वकर्तव्यं पालनीयम्। स्वकर्तव्यं न कदाचिदपि त्याज्यम् ।**

प्रश्नाः :

एकपदेन उत्तरत :

(i) प्राणिनः का धारयति?

(ii) किं कदाचिदपि न त्याज्यम?

पूर्णवाक्येन उत्तरत :

(क) मनुष्याणां जीवने कदा उन्नतिः भवति?

(ख) कः समाजस्य रक्षकः आदरभूतश्च भवति?

प्रदत्त विकल्पेभ्यः उचितम् उत्तरं चित्वा लिखतः

(i) 'तपति' इति क्रियापदस्य कट्टपदं किम् अस्ति :

(अ) सूर्यः

(ब) वायुः

(स) मानदः

(द) धरा

(ii) जीवन सुखमयं कर्तुं............अत्र विशेषणपदं किम् अस्ति :

(क) जीवनम्

(ब) सुखमयम्

(स) कर्तुम्

(द) सन्ति

(i1i) 'निरन्तरम् अस्य कः पर्यायः गद्यांशे प्रयुक्तम्

(अ) सततम्

(ब)सुखमयम्

(स)सेवा

(द) त्याजयम्

(iv) 'दुःखमयम्' अस्य कः विलोमः गद्यांशे प्रयुक्तम्

(क) सुखमयम्

(ख) आचरणम्

(स) कर्तुम्

(द) सततम्

(IV) अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं संस्कृतेन लिखतः।

उत्तर 1.कर्तव्यपालनं

स्वकर्तव्यं

2.मनुष्याणां जीवने कर्तव्यपालनेनैव सर्वदा उन्नतिर्भवति।

यः मानवः कर्तव्यपरायणः भवति स एव समाजस्य रक्षकः आदरभूतश्च भवति।

3सूर्यः

सुखमयम्

सततम्

सुखमयम्

4 कर्तव्यपालनं

**8.प्रयागे गङ्गायमुनयोः सङ्गमः भवति तत्र द्वयोः नद्योः संगमतटे माघमासे मेलापकः आयोज्यते। द्वादशवर्षेषु एकबारं महाकुम्भो भवति। महाकुम्भे देशिकाः वैदेशिकाः, संन्यासिनः, यतिनः, सन्तजनाः, वेदज्ञाः, विद्वांसः,**

**सर्वेषां धर्माणां प्रचारकाः सम्मिलन्ति सर्वे संगमे स्नानंकृत्वा आत्मानं धन्यम् मन्यन्ते । गङ्गायाः विस्तृतंवर्णनं कालिदासेन रघुवंशकाव्ये सम्यग् विहितम् ।**

प्रश्नाः

(1) प्रयागे कयोः नद्योः सङ्गमः भवति ?

(2) संगमतटे मेलापकः कदा आयोज्यते ?

(3) द्वादशवर्षेषु एकबारं प्रयागे किं भवति ?

(4) 'वर्णनम्' इतिपदस्य विशेषणं किम् ?

(5) 'देशिकाः' इति पदस्य किं विलोम पदमत्र प्रयुक्तम् ?

उत्तर

1-गङ्गायमुनयोः

2-माघमासे

3-महाकुम्भो

4-विस्तृतं

5-देशिकाः

**9.अधुना पर्यावरणस्य समस्या न केवलं अस्माकं अपितु समस्तविश्वस्य ज्वलन्त समस्या वर्तते। यज्जलं यश्च वायुः, अद्य उपलभ्यते, तत्सर्वं मलिनं दूषितश्च दृश्यते । उद्योगानां प्रदूषित जलं नालानां माध्यमेन वहति गंगासदृशी पावनी नदीमपि अद्य मलिनतां गता । असमाकं पूर्वजाः पर्यावरणस्य शुद्धतायै उपवनानां उद्यानानाम् च आरोपणम् कुर्वन्ति स्म। विगतकाले वनानां छेदनेन वृक्षाणाम् अभावो अभवत् । तेषां अभावे अपेक्षिताः वृष्टिः न भवति । अनावृष्टिः अस्माकं कृषिकार्यम् बाधते । पर्यावरणस्य रक्षायै वयं सर्वथा सचेष्टाः भवेम।**

1. अधुना पर्यावरणस्य समस्या कुत्र वर्तते?

क. भारतदेशे

ख. अमेरिका देशे

ग. समस्त विश्वे

2. पूर्णवाक्येन उत्तरत-

अस्माकं पूर्वजः पर्यावरणस्य शुद्धतायै किम् कुर्वन्ति स्म ?

3. भाषिक कार्यम्

क. अस्मिन् अनुच्छेदे भवेम क्रियापदस्य कर्तृपदं किम्?

अ. उद्योगपतिः

ब. वयं

स. पूर्वजाः

द. वृक्षाणि

4. 'पावनी नदी' पदयोः विशेषणपदं किम्?

उत्तर

1- ग

2- असमाकं पूर्वजाः पर्यावरणस्य शुद्धतायै उपवनानां उद्यानानाम् च आरोपणम् कुर्वन्ति स्म।

3-ब

4- पावनी

10.वीराणां कदापि मृत्युः न भवति । समाजाय राष्ट्राय वा स्वजीवनं अर्पयित्वा ते अमराः भवन्ति। तेषु वीरेषुं आसीत् एकः महावीरः क्रांतिकारी चन्द्रशेखरः आजादः । स्वतन्त्रता आन्दोलने एकतः महात्मागान्धि-सदृशाः अंहिसायाः अनुयायियः आसन् । अपरतः क्रान्तिकारिणः आसन, ये मातृभूम्यै स्वरक्तं अर्पितवान् । यदा चन्द्रशेखरः चतुर्दशवर्षीयः एव आसीत् तदा एव सः स्वतन्त्रता आन्दोलने अकूर्दत् । कारागारे बन्दीभूतः स 'महात्मा गांधी जयतु भारतमाता जयतु इति उदघोषं कृतवान् । एतेन रूष्टाः आंग्लाधिकारिणः तम् भृशम् अताऽयन सः मूच्छिछतः अभवत्। न्यायालये न्यायाधीशः तम् अपृच्छत्- तव किं नाम? स गर्वेण उत्तरत- "आजादः"

प्रश्नाः-

1. एकपदेन उत्तरत-

(i) केषां मृत्युः न भवति?

(ii). स्वतंत्रता आन्दोलनस्य महान् वीरः कः आसीत् ?

2. पूर्णवाक्येन उत्तरत-

यदा कारागारे बन्दीभूतः आजादः भारतमाता जयतु इति उद्घोषं कृतवान् तदा आंग्लाधिकारिणः कीदृशं व्यवहारं अकरोत्?

3. निर्देशानुसारम् उत्तरत-

(1) "रूष्टाः आंग्लाधिकारिणः " अनयोः पदयोः विशेषणपदं चित्वा लिखत।

अ. रूष्टाम्

ब. प्रसन्नः

स. रूष्टाः

द. रूष्टायाः

(2)" कृतवान् " इति क्रियापदस्य कर्तृपदं किम् ?

अ. आजादः

ब. महात्मा गांधी

स. सः

द. त्वम्

4. अस्य गद्यांशस्य समुचितं शीर्षकं लिखत।

उत्तर

1-(1) वीराणां

(2)चन्द्रशेखरः आजादः

2-आंग्लाधिकारिणः तम् भृशम् अताऽयन सः मूच्छिछतः अभवत्।

3-(1) स

(2) आजादः

4-चन्द्रशेखरः आजादः

11.भारतवर्षः अस्माकं प्रियः राष्ट्रः । एतस्य उत्तरस्यां दिशि हिमालयः, दक्षिण दिशि च हिन्द महासागरः अस्य चरणौ प्रक्षालयति। प्राचीनकाले अस्याभिधानं :आर्यावर्तः" आसीत् । अत्रपुरा भरतः' नामकः एकः प्रतापी नृपः अभवत् तस्यैव नाम्ना 'भारतवर्षम्' इति प्रसिद्धम्। अत्र सर्वत्र प्रकृतेः स्वाभाविकी शोभा दृश्यते । अस्माकं देशे विविधाः भाषाः, विभिन्नाः संप्रदायाश्च सन्ति। 'अनेकतायां एकता' इति भारतीय संस्कृतेः प्रमुखा विशेषता। अस्य धर्मः, दर्शनम्, ज्ञानम् साहित्यं च सर्वम् अप्रतिमम् अद्यापि समीचौनम् उपयोगिनश्च सन्ति।

1. एकपदेन उत्तरत-

(i) भारतस्य उत्तरस्यां दिशि कः वर्तते?
क. विंध्याचलः
ख. हिमालयः
ग. कैलाश:
घ. अरबसागरः
2. पूर्णवाक्येन उत्तरत-
दक्षिण दिशि कः अस्य चरणौ प्रक्षालयति?
3. निर्देशानुसारम् उत्तरत-
(1) 'अस्यभिधानं' अस्मिन् पदे 'अस्य' सर्वनामपदं कस्मै प्रयुक्तम्
क. हिमालयस्य
ख. हिन्द महासागरस्य
ग. भारतस्य
घ. मानवस्य
(ii) 'युष्माकं' इत्यस्य विलोमपदं चित्वा लिखत
क. अस्माकं
ख. तव
ग. मम
घ. मध्यम्
**उत्तर**
**1-ख**
**2-दक्षिण दिशि च हिन्द महासागरः अस्य चरणौ प्रक्षालयति।**
**3-1(ग)**
**2(क)**

**12.सदाचारिपुरुषाणां व्यक्तित्वमनुपमं भवति । ते समुद्रवत् गम्भीराः, हिमालयवत् उच्चा, धरणीव सहनशीलाः सूर्यवत् तीव्राः, चन्द्रवत् शीतलाश्च भवन्ति । ते यत् कथयन्ति तस्य पालनमपि कुर्वन्ति । "मनस्येकं, वचस्येकं, कर्मण्येकम्" इति तेषां व्यवहार: भवति अतएव अस्माकं महर्षिभि: कथितम्-आचार: परमो धर्मः । अस्माकं पूर्वजा: सदाचारिण: आसन् । (महर्षिणा मनुना अपि कथितम् - आचारात् लभुते ह्यायुः)। आचार: सर्वधर्माणां मूर्धानमधिरोहति । सदाचारी जन: देवैरपि पूज्यते सदाचरणेन एव राम: कृष्ण: महात्मा बुद्धः, महावीरस्वामी च अद्यापि यश:शरीरेण जीवन्ति अतः चरित्रमेव सर्वदैव संरक्षणीयम् ।**
प्रश्ना:
(1)सदाचारिणां व्यवहार: मनसि वचसि कर्मणि च कथं भवति ?
(2)आचारात् किं किं लभ्यते ?
(3) किं सर्वदैव संरक्षणीयम् ?
(4) 'आसन्' इति क्रियापदस्य कर्तृपदं किम् ?
(5) 'अनुपमम्' इति विशेषणस्य विशेष्यं किम् ?
उत्तर 1. मनस्येकं, वचस्येकं , कर्मण्येकम् ।
2 आचारः सर्वधर्माणां मूर्धानमधि रोहति ।
3 चरित्रमेव सर्वदैव संरक्षणीय ।

4 सदाचारिणः।
5 व्यक्तित्वम्।

**13.यदा अर्जुनः महाभारतस्य युद्धे आत्मनः सम्मुखे स्वभातृन् गुरूजनान् सम्बन्धिनश्च दृष्टवा खिन्नः निराशश्चाभवत् सः दुःखितमनसा स्वास्त्रशस्त्राणि व्यक्त्या युद्धात् पलायनायम् तत्परोऽभवत्। तदा ते - युद्ध-विमुखं दृष्ट्वा श्रीकृष्णेन तस्मै गीतायाः उपदेशं दत्तवान्। श्री कृष्णस्य अर्नुनाय दत्तं उपदेशं गीतायां महर्षिः वेदव्यासेन निबद्वम्। गीतायां अष्टादश अध्यायाः सन्ति। गीता मनुष्यमात्र निष्कामकर्मणः संदेशं ददाति। गीतायां उक्तम् - कर्मण्ये वाधिकारास्ते मा फलेषु कदाचनं · निष्काम कर्मव्यवहारः एव अस्माकं जीवनोद्वारस्य उपायः। गीता अखिल विश्वस्य हितार्थ एकम् अद्वितीयग्रन्थमस्ति।**

प्रश्नाः

1. एकपदेन उत्तरत-

1. कः महाभारतस्य युद्धे खिन्नः अभवत्?
2. अर्जुनः कानि व्यक्त्वा युद्धात् पलायनाय तत्परोऽभवत्?

2. पूर्णवाक्येन उत्तरत-

गीतायां महर्षिः वेदव्यासेन किम् निबद्वम् कृतम्।

3. 'तत्परोऽभवत्' इति क्रियापदस्य किं कर्तृपदम्?

अ. श्रीकृष्णः
स. अर्जुनः
ब. कर्णः
द. महर्षिः वेदव्यासः

4. 'युद्ध विमुखं' दृष्ट्वा श्रीकृष्णेन तस्मै गीतायाः उपदेशं दत्तवान्' इत्यत्र तस्मै' इति सर्वनाम पदं कस्मै प्रयुक्तम ?

अ. छात्राय
स. अर्जुनाय
ब. मानवाय
द. भीमाय

5. अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत।

**उत्तर**

**1- अर्जुनः**
**स्वास्त्रशस्त्राणि**
**2- श्री कृष्णस्य अर्नुनाय दत्तं उपदेशं गीतायां महर्षिः वेदव्यासेन निबद्वम्।**
**3- अर्जुनः**
**4- अर्जुनाय**
**5- गीता**

**14.एकदा द्वौ धनिकौ आस्ताम्। तयोः धनिकयोः मध्ये विवादः जातः। उभौ अपि न्यायालयं गतवन्तौ। एकः धनिकः अचिन्तयत् - अहं लक्षं रूप्यकाणि न्यायाधीशाय उत्कोचरूपेण ददामि इति। सः स्यूते लक्षं रूप्यकाणि स्थापयित्वा न्यायाधीशस्य गृहं गतवान्। न्यायाधीशः तस्य मन्तव्यं ज्ञात्वा क्रुद्धः अभवत्। धनिकः न्यायाधीशम् अवदत्- भोः ! मत्सदृशाः लक्षरूप्यकाणां दातारः दुर्लभाः एव। न्यायाधीशः धनिकम् अवदत्- लक्ष-लक्षरूप्यकाणां**

**दातारः कदाचित् अन्ये अपि भवेयुः परन्तु लक्षरूप्यकाणां निराकर्त्तारः मत्सदृशाः अन्ये विरलाः एव। अतः कृपया गच्छतु। न्यायस्थानं मलिनं मा करोतु। लज्जितः धनिकः धनस्यूतं गृहीत्वा ततः निर्गतः।**

अ एकपदेन उत्तरत - (केवलं प्रश्नचतुष्टयम्)

(i) कयोः मध्ये विवादः जातः?

(ii) कः लज्जितः भूत्वा निर्गतः?

(iii) उभौ कुत्र गतवन्तौ?

(iv) धनिकः कति रूप्यकाणि न्यायाधीशाय दातुम् इच्छति स्म?

(v) लज्जितः धनिकः किं गृहीत्वा निर्गतः?

2- पूर्णवाक्येन लिखत - (केवलं प्रश्नद्वयम्)

(i) धनिकः न्यायाधीशं किम् अवदत्?

(ii) न्यायाधीशः किम् अवदत्?

(iii) एकः धनिकः किम् अचिन्तयत् ?

यथानिर्देशम् उत्तरत - (केवलं प्रश्नचतुष्टयम)

(i) 'एकदा द्वौ धनिकौ आस्ताम्' अत्र किं क्रियापदम्?

(क) एकदा

(ख) धनिको

(ग) आस्ताम्

(ii) लज्जितः' इति विशेषणपदस्य विशेष्यपदं किम् ?

(क) न्यायाधीशः

(ख) धनिकः

(ग) दातारः

(1i) 'निर्धनः' इति पदस्य किं विलोमपदं गद्यांशे प्रयुक्तम्?

(क) न्यायाधीशः

(ख) धनिकः

(ग) विवादः

(iv) 'अहं लक्ष रूप्यकाणि.....ददामि' अस्मिन् वाक्ये 'अहम्' इति पदं कस्मै प्रयुक्तम्?

(क) धनिकाय

(ख) न्यायाधीशाय

(ग) न्यायालयाय

उत्तर

1-एकपदेन उत्तरत-

(i) धनिकयोः

(ii) धनिक

(iii) न्यायालयम्

(iv) लक्ष रूप्यकाणि / लक्षरूप्यकाणि

2- पूर्णवाक्येन लिखत

(1) धनिकः न्यायाधीशम् अवदत्- भोः ! मत्सदृशाः लक्षरूप्यकाणां दातारः दुर्लभाः एव।

(ii) न्यायाधीशः धनिकम अवदत- लक्षा-लक्षरूप्यकाणां दातारः कदाचित् अन्ये अपि भवेयुः परन्तु लक्षरूप्यकाणां निराकर्त्तारः मत्सदृशाः अन्ये विरला; एव। अतः कृपया गच्छतु। न्यायस्थानं मलिन मा करोतु।

(iii) एकः धनिकः अचिन्तयत् -अहं लक्ष रूप्यकाणि न्यायाधीशाय उत्कोचरूपेण ददामि इति

(स) यथानिर्देशम् उत्तरत

(ग) आस्ताम

(ख) धनिकः

(ख) धनिकः

(क) धनिकाय

**15.रामायणम् अस्माकं धर्मग्रन्थः अस्ति। रामायणस्य रचयिता वाल्मीकि: अस्ति। अस्मिन् ग्रन्थे मर्यादा पुरुषोत्तमस्य श्रीरामस्य जीवनस्य वृत्तान्तः अस्ति। भगवान् श्रीरामः स्वपितुः वचनं रक्षितुं, चतुर्दश वर्षाणि वने अवसत्। श्रीरामेण सह तस्य पत्नी सीता, लक्ष्मणः च अपि वनम् अगच्छताम्। वने लंकायाः राजा रावणः सीताम् अहरत्। तत्र श्रीरामः वानराणां सहायतया रावणं हत्वा सीताम् अलभत। रामायणम् अस्माकं राष्ट्रस्य अमूल्यः निधिः अस्ति। रामायणं पठित्वा जनाः शान्तिप्रियाः सदाचारिणः च भवन्ति।**

1. एकपदेन उत्तरत-

(i) रामायणस्य रचयिता कः अस्ति?

(ii) श्रीरामः कति वर्षाणि वने अवसत्?

(iii) श्रीरामः केषां सहायतया सीताम् अलभत ?

(iv) रामायणे कस्य जीवनस्य वृत्तान्तः अस्ति?

2. पूर्णवाक्येन उत्तरत -

(i) श्रीरामेण सह कौ वनम् अगच्छताम्?

(ii) रामायणं पठित्वा जनाः कीदृशाः भवन्ति?

3. निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत

(क) 'जनाः' इति कर्तृपदस्य क्रियापदं किम् ?

(i) अस्ति (ii) भवन्ति

(iii) रामायणम् (iv) पठित्वा

(ख) 'श्रीरामः' इति विशेष्यपदस्य विशेषणपदं किम् ?

(i) भगवान् (ii) स्वपितुः

(i1i) वने (iv) आज्ञाम्

(ग) 'अशान्तिप्रियाः' इति पदस्य विलोमपदं गद्यांशात् चित्वा लिखत - (1) शान्तिप्रियाः

(2) जनाः

(3) सदाचारिणः

(4) अमूल्याः

(घ) 'तस्य पत्नी' अत्र तस्य इति सर्वनामपदं कस्मै प्रयुक्तम्?

(i) रामाय (ii) रावणाय

(iii) लक्ष्मणाय (iv) सीताय

IV. गद्यांशस्य उचितं शीर्षकं लिखत।

उत्तर 1.रचयिता वाल्मीकिः

चतुर्दश वर्षाणि

वानराणां

श्रीरामः

2.श्रीरामेण सह तस्य पत्नी सीता, लक्ष्मणः च अपि वनम् अगच्छताम्।

रामायणं पठित्वा जनाः शान्तिप्रियाः सदाचारिणः च भवन्ति।

3.भवन्ति

भगवान्

शान्तिप्रियाः

रामाय

4.रामायणम्

# 2.पत्र

**1. भवान् सुरेशः, छात्रावासे निवसति। आगरास्थं ताजभवनं द्रष्टुं शैक्षिकभ्रमणाय गन्तुं भवान् इच्छति । तदर्थं धन प्रेषणाय पितरं प्रति लिखितं पत्रं मंजूषायां प्रदत्तैः शब्दैः रिक्तस्थानानि पूरयत**

विद्यालय छात्रावास:
प्रयागनगरम्
परमादरणीयाः पितृमहोदयाः,
सादरं प्रणामामि ।

सविनयं (i)..................यत् मम अर्द्धवार्षिकी परीक्षा समाप्ताजाता। मम परीक्षा (ii)..........................अग्रिमे अवकाशे अहं गृहं न (iii).................... । तत्र कारणम् अस्ति यत् विद्यालयेन एकस्य (iv).................... आयोजनं कृतम् । एषा यात्रा आगरास्थ ताजभवनं द्रष्टुम् आयोजिता वर्तते । अतः तत्र व्ययार्थपंचशतं (v).................... भवन्त: प्रेषयन्तु । सर्वेभ्यः मम प्रणामाः।

भवतां प्रिय पुत्रः
सुरेशः

| मञ्जूषा |
|---|
| शोभना, निवेदनम्, आगमिष्यामि, शैक्षिक भ्रमणस्य, सूप्यकाणि, प्रणामाः |

| उत्तर |
|---|
| 1निवेदनम्, 2शोभना, 3आगमिष्यसि, 4शैक्षिक भ्रमणस्य , 5 रुप्यकाणि |

**2.मित्रं प्रति, परीक्षायां सफलतायै लिखितं पत्रं, मञ्जूषायां प्रदत्तैः शब्दैः पूरयत**

नवदेहली
25.6.2020

(i)..................
(ii).................

भवतः परीक्षासफलतापत्रम् अद्यैव (1ii)....................। भवतः उत्तीर्णतां ज्ञात्वा मयि अति (iv).................... अस्ति। अहोरात्रं प्रयास विधाय 95 प्रतिशत (v).................... लब्धवान्। भवान् मम साधुवादान् अर्हति।
भवते पुनः वर्धापनं,

भवतः मित्रम्
सुरेन्द्र

| मञ्जूषा |
|---|

| सन्तोषः, प्राप्तम्, अंकान्, प्रियमित्र, नमोनमः, पितृभ्याम् |
|---|
| उत्तर |
| 1 पितृभ्याम् 2 नमोनमः 3 प्राप्तम् 4 सन्तोषः 5 अंकान् । |

**3.भवान् सौम्यः । भवतां मित्रं राकेशः दूरदर्शनात् प्रसारित नाटके भागं गृहीतवान् सर्वोत्तम-अभिनयकृते पुरस्कारं च प्राप्तवान् । तं प्रति अभिनन्दनपत्रं मञ्जूषायां प्रदत्तैः शब्दैः रिक्तस्थानानि पूरयित्वा लिखतु ।**

जयपुरतः
तिथि :

प्रिय वयस्य राकेश
नमस्ते ।

'हृत्परिवर्तनम्' नाम नाटके त्वम् (i)................ कृतवान्, (ii).............. च प्राप्तवान् इति मया ज्ञातम् । विगत शनिवासरे (iii).................. नववादनकाले मया दूरदर्शनतः तस्य (iv)................. प्रसारणम् अपि दृष्टम् । अतीव (v).................. जाता । अभिनन्दयामि त्वाम्।

तव मित्रम्
साम्य :

| मञ्जूषा |
|---|
| पुरस्कारम्, संध्यायाम, नाटकस्य, अभिनयम्, शोभनम्, प्रसन्नता |
| उत्तर |
| 1 अभिनयम् 2 पुरस्कारम् 3 संध्यायाम् 4 नाटकस्य 5 प्रसन्नता । |

**4.भवान् सौरभः । भवतां मित्रं सुरेशः संस्कृत श्लोक -वाचनप्रतियोगितायां प्रथमपुरस्कारं लब्धवान् । तम् प्रति अभिनन्दनपत्रं मंजूषायां प्रदत्तैः शब्दैः रिक्तस्थानानि पूरयित्वा लिखतु ।**

मालवीय नगरम्
तिथिः.............

प्रिय मित्र सुरेश
नमस्ते
भवान संस्कृत श्लोक वाचने प्रथमं (i)................. प्राप्तवान् इति ज्ञात्वा अतीव (ii).............. जाता। त्वं तु सत्यमेव(iii)................. इति मन्ये। लिखतु (iv)................. त्वं गृहम् आगमिष्यसि। सर्वे त्वां स्मरन्ति (v).............. च।

तव सुहृत्

सौरभः

| मञ्जूषा |
|---|
| प्रतिभाशाली, सम्मानम्, प्रसन्नता, अभिनन्दन्ति, कदा, विद्यालये |

| उत्तर |
|---|
| 1 सम्मानम् 2 प्रसन्नता 3 प्रतिभाशाली 4 कदा 5 अभिनन्दन्ति |

**5.भ्रातुः विवाह-अवसरे स्वमित्रस्य निमन्त्रणार्थम् अधोलिखितम् पत्र मञ्जूषायाः सहायतया पूरयत।**

गांधीनगरम्
दिल्ली।
दिनाङ्कः

प्रिय मित्र सक्षम!
सप्रेम नमो नमः।

अत्र कुशलं तत्र अस्तु। एतद् 1 ................ भवान् अतीव प्रसन्नो 2................. यत् मम ज्येष्ठ-भ्रातुः विवाहः अग्रिम-मासस्य पञ्चम्यां तिथौ निश्चितः। भवतः परिवारेण सह 3 ............... अनिवार्या। गृहे माता-पित्रोः 4............... मम प्रणामः। भवतः 5...................प्रतीक्षायाम्।

भवदीयं मित्रम्
सूर्यः

| मञ्जूषा |
|---|
| भविष्यति, आगमनस्य, चरणयोः, उपस्थितिः, ज्ञात्वा |

| उत्तर |
|---|
| 1 ज्ञात्वा 2 भविष्यति 3 उपस्थिति 4 चरणयोः 5 आगमनस्य। |

**6.(मित्रं प्रति)**
**उचितशब्दैः रिक्तस्थानानि पूरयित्वा पत्रं पुनः लिखन्तु-**

परीक्षा भवनात्
तिथिः.............
प्रिय मित्र,

प्रिय मित्र,
सस्नेहं नमो नमः

अत्र कुशलं तवास्तु। अहम् पाठ्यपुस्तके एका (1) ................
अपठम्। तस्याम् एकः बालः आसीत्। सः पठने अकुशलः आसीत्। एकदा सः (2) .................. एकम् कूपम् अपश्यत्। कूपस्य उपरि पाषाणशिलायाम् एकं गर्तम् दृष्ट्वा बालः तस्य विषये मातरम् अपृच्छत्। माता अवदत् पाषाणशिलायां पुनः घटस्थापनेन एषः गर्तः निर्मितः। बालः अचिन्तयत्-यदि (3) .................. पुनः पुनः घटस्थापनेन (4) ................ अभवत् तर्हि मम मतिः अपि पुनः पुनः पठनेन तीव्रा भविष्यति। एवं सः (5) .............. कृत्वा बुद्धिमान् अभवत्।
आशां करोमि यत् कथां पठित्वा त्वमपि पठनाय प्रेरितः भविष्यासि (6) .................... नमो नमः।
भवतः मित्रम्
सुबोधः

| मञ्जूषा- पितृभ्याम, कथाम्, परिश्रम, मार्गे, पाषाणशिलायाम्, गर्तः |
|---|
| उत्तर |
| 1 कथाम् 2 मार्गे 3 पाषाणशिलायाम् 4 गर्तः 5 परिश्रम 6 पितृभ्याम्। |

**7.विद्यालयात् अवकाशार्थं प्रधानाचार्यं प्रति अधोलिखितं पत्रं मञ्जूषातः उचितपदानि गृहीत्वा पूरयत-**

सेवायाम्.

मान्याः प्रधानाचार्याः.
कुलाची-हंसराज-मॉडल-विद्यालयः
अशोक-विहारः, दिल्ली।

महोदयाः

सविनयं (1) .................. इदम् अस्ति यत् (2) ................ अहं ज्वरेण (3) .................. अस्मि। ज्वर-कारणात् अहं (4) ................ आगन्तुम् असमर्थः अस्मि। कृपया माम् (5) .................. अवकाशं प्रदाय अनुग्रहणन्तु।

भवदीयः शिष्यः,
अनुजः

| मञ्जूषा- दिनद्वयस्य, निवेदनम्, गतरात्रौ, पीडितः, विद्यालयम् |
|---|
| उत्तर |
| 1 निवेदनम् 2 गतरात्रौ 3 पीडितः 4 दिनद्वयस्य 5 विद्यालयम्। |

**8.भवान् दीपकः। भवतां मित्रं रमेशः अन्यस्मिन् नगरे वसति। तं प्रति नववर्षस्यागमेशुभकामनाः मंजूषायां प्रदत्तैः शब्दैः रिक्तस्थानानि पूरयित्वा प्रेषयतु।**

द्वारकानगरम्
तिथि :-

प्रिय मित्र रमेश,
सप्रेम नमस्ते।

नववत्सरोऽयं तव (1) .................... प्रतिदिनं सौख्यं (2) ..................
समृद्धि (3) .....................च पूरयेत्। गृहे (4) .................. परिवारजनानां कृतेऽपि नववर्षस्य (5) .................
स्युः।

तव सुहृत्,
दीपक:

| मञ्जूषा |
| --- |
| सफलतां, पूरयेत्, जीवने, नवतां, सर्वेषां शुभकामनाः |

**9.भवान् विजयः, भवतां मित्रं दिनेशः चेन्नई नगरस्थः। तं प्रति जन्मदिनस्य शुभकामना-पत्रं मञ्जूषायां प्रदत्तैः शब्दैः रिक्तस्थानानि पूरयित्वा लिखतु।**

स्थानम्-लक्ष्मणपुरम्
तिथिः

प्रिय मित्र दिनेश,
नमो नमः,

तव (1).............. अस्मिन् मासे एव (2) .............. । अहं तदर्थं (3) .............. प्रेषयामि। तव जीवनं (4) ............... समृद्धं तथा च (5) .............. स्यादिति अहं कामये। आत्मनः शुभकामना प्रेषयामि। इति;

तव सुहृत्
विजयः

| मञ्जूषा |
| --- |
| भविष्यति, शुभकामनाः, जन्मदिनम्, सुखपूर्णम्, स्वास्थ्यकरम् |
| उत्तर |

| |
|---|
| 1 जन्मदिनम् 2 भविष्यति 3 शुभकामना 4 स्वास्थ्याकरम् 5 सुखपूर्णम्। |

**10.भवान् राकेशः छात्रावासे जयपुरविद्यापीठे वसति । भवतः विद्यालये संस्कृतदिवसे मालविका-अग्निमित्रम् इति संस्कृतनाटकस्य मञ्चनं भविष्यति । तत्र भवान् अपि अभिनयं करिष्यति स्वपितृमहोदयान् प्रति तं प्रेक्षितुं निमन्त्रणपत्रं, मंजूषायाम् प्रदत्तैः शब्दैः रिक्तस्थानानि पूरयित्वा लिखतु।**

जयपुर विद्यापीठ छात्रावासः
तिथिः

परमादरणीयाः पितृमहोदयाः
सादरं नमामि ।

अद्य अहं सादरं (1) ................ यत् विद्यालये आगामि (2) ................
संस्कृत दिवसस्य आयोजनं भविष्यति । तत्र (3) ................. नाम नाटकं प्रस्तूयते । एतस्मिन् (4) ................. अहमपि अभिनयं (5)................ भवान् मात्रा सह आगत्य अवश्यमेव पश्यन्तु ।

भवतां प्रियः पुत्रः
राकेशः

| मञ्जूषा |
|---|
| मालविकाग्निमित्रम्, निवेदयामि, अवसरे, मासे, करिष्यामि, दिवसस्य |

| उत्तर |
|---|
| 1 निवेदयामि 2 मासे 3 मालाविकाग्निमित्रम् 4 अवसरे 5 करिष्यामि । |

# 3.चित्र

अधोलिखितं चित्रं दृष्ट्वा मंजूषायां प्रदत्तशब्दानां सहायतया पञ्चवाक्यानि लिखत



मंजूषा

न गृहस्य, मम, समीपे, एव, हट्टम, अस्ति। तत्र विविधानि, आपणानि सन्ति, जनाः तत्र , गत्वा प्रतिदिनं, दैनिकोपयोगाय वस्तूनि, क्रीणन्ति, तत्र, शाकादीनाम्, विक्रय्, अपि, जनाना, महान्, अत्र, सम्मर्दः, दृश्यते




मञ्जूषा

रेलयानम्, रेलस्थानकम्, यात्रिणः, आरोहन्ति, अवरोहन्ति, भारवाहका, नयन्ति, भारम्।



| मञ्जूषा |
|---|
| षष्ठी पूजनस्य, अवसरः, वृक्षस्य अधः, जनाः, बालकाः, महिलाः, स्नानं, जलमध्ये, स्थिताः, केचन, पूजां, कुर्वन्ति, जले जनानां, छाया, पवित्रं जलं, स्वच्छम् |



| मंजूषा |
|---|
| जंत्वागारः, सिंहदम्पती, सिंहशावकौ, बालकः बालिका, मात्रा सह, पित्रा सह, अवलोकयन्ति, |
| जलपात्रम्, भोजनपात्रम् |



| मंजूषा |
|---|
| परीक्षाभवनम्, दत्तचित्तछात्रा, निरीक्षकद्वयम्, उत्तरपुस्तिकावितरणम्, प्रश्नपत्राणां वितरणम्, भित्तौ घटिका, सार्धनववादनम्, बालकानां स्यूतादयः, कोष्ठात् बहिः |



| मंजूषा |
|---|
| सर्षपक्षेत्रम्, परितः, वृक्षाः, वृक्षस्य उपरि मयूरः, बालकः । |



| मञ्जूषा - |
|---|
| बालिकाः, शिक्षिका, व्यजनानि, वातानुकूलनयन्त्रम्, आसन्दाः, उत्पीठिका तिष्ठन्ति, ध्यानेन शृण्वन्ति , विद्युत्-फलकम् (स्मार्टबोर्ड), महापुरुषाणां चित्राणि, अग्निशमनयन्त्रम् , भित्तौ , कक्षा । |



| मञ्जूषा |
| --- |
| पंचवट्यां कुटी, रामः सीता मयूरः, लक्ष्मणः, पुष्पाणि, पत्राणि, नद्याः तटे, हंसः, उपविष्टौ, हस्ते धनुः, तिष्ठति, कमलपुष्पम्, खादति, पार्श्वे हरिणः, पश्यति |



| मञ्जूषा |
| --- |
| वने, धावति, सिंहः, बानराः, वृक्षाः, कूर्दन्ति, वृक्षेषु, पुष्पाणि. पत्राणि गजः, भल्लूकाः, उष्टः मृगाः, च |



| मज्जूषा |
| --- |
| बालकाः पृच्छन्ति, पृष्ठे वर्तुलाकारे पात्रे, पर्वतारोहिणौ पर्वतेषु वृक्षाणाम् अभावः, वायौ ओषजनः न्यूनः, श्वासे काठिन्यम्। अतः वृक्षान् विना, मानवजीवनम्, अरक्षितम्, वृक्षाणाम् कर्तनम् अनुचितम्। |

# 4.अनुच्छेद

**अधोलिखितं विषयमधिकृत्य मञ्जूषापदसहायतया पञ्चवाक्येषु एकमनुच्छेदं लिखत**

**1.सत्सङ्गतिः**

| मञ्जूषा |
|---|
| सज्जनानां, सङ्गतेः महान् प्रभावः, कीटः, देवतानां शिरसि, पुष्पाणां, आरोहति, क्रूरः सहृदयः, बुद्धेः जडतां, दुर्जनः, सज्जनः, सतां दर्शनं, कुसङ्गतिः, सर्व, नाशयति, यशः, प्रसरति |

**2.शरीरमाद्यं खलु धर्मसाधनम्**

| मञ्जूषा |
|---|
| स्वास्थ्यं, शरीरस्य, आवश्यकम्, कार्यसम्पादनम्, जीवने सफलतायै, वरदानम्, दीर्घजीवनस्य कामना, स्वस्थं मनः, बुद्धिः, स्वस्थः आत्मा जीवनम् आनन्दमयम्। |

**3.'वसुधैव कुटुम्बकम्**

| मञ्जूषा |
|---|
| उदारचरितानां, सम्पूर्णजगत्, परिवारः, लघुचेतसां, मम, तव इति गणना, आत्मवत्, सर्वान् मनुष्यान्, परहिते निरताः, धारयन्ति, जीवनम्, वयं सर्वे, पुत्रः, एकस्य, परमात्मनः, देवाः, दानवाः । |

**4.'शिक्षकदिवसः**

| मञ्जूषा |
|---|
| अनेकत्र, सितंबरमासस्य, पञ्चमे दिवसे, महत्त्वं, शिक्षकाणां प्रगीयते, पूर्वराष्ट्रपति राधाकृष्णन् महोदयस्य, जन्मदिवसे, आयोज्यते, शिक्षकाणां स्तुतिः |

**5. विज्ञानस्य आविष्काराः**

| मञ्जूषा |
|---|
| अस्माकं सुखमयम् आनन्दमयम, विज्ञानस्य, जीवनं, कृतम्, आविष्कारैः, रेलयानम्, विमानम् अन्यैः यातायातसाधनैः सुकरम्, निखिलम् कार्यम्, शीघ्रतया, विना परिश्रमेण, सुष्ठु भवति, रोगनिवारणाय, यन्त्राणि, समयस्य, परिश्रमस्य। |

**6.उद्यमेनैव सिध्यन्ति कार्याणि न मनोरथैः**

| मञ्जूषा |
|---|
| उद्यमेन, छात्रः, उत्तीर्णः, आलस्यं, महारिपुः, |
| भोजनं, मुखे, नैव, जनाः, महापुरुषाः, परिश्रमेण, सुव्यवस्थितं, जीवनं, समीपस्य, ईश्वरः, सहायकः अनुसन्धानानि, वैज्ञानिकानि, प्रगतिः, संसारे |

**7.संस्कृतभाषायाः महत्वम्**

| मञ्जूषा |
|---|
| स्वास्थ्याय, आवश्यकं, भवेत्, स्वच्छता, वातावरणं शरीरस्य, परिसरस्य, अभियानं. सर्वे. मिलिता, स्वस्थंमनः, आत्मा, सुखमयं, आनंददायकं रोगनिवारकम् |

**8"स्वच्छता अभियानम्"**

| मञ्जूषा |
|---|
| स्वास्थ्याय, आवश्यकं, भवेत्, स्वच्छता, वातावरणं शरीरस्य, परिसरस्य, अभियानं. सर्वे. मिलिता, स्वस्थंमनः, आत्मा, सुखमयं, आनंददायकं रोगनिवारकम् |

**9.किसान/कृषक**

| मञ्जूषा |
|---|
| कृषिप्रधान, भारतदेशः, कृषकाणां संख्या, राष्ट्रस्य पोषणं, कठिनं परिश्रमंकुर्वन्ति, अन्नदाता, सुखिनः न सन्ति, श्रमपूर्णं |

**10.अनुशासन**

| मञ्जूषा |
|---|
| जीवनस्य विकासाय, समाजस्य, अस्माकं विद्यालयस्य, व्यवहारेषु, देशस्य, परिवारस्य, आत्मिक उन्नति, लोक कल्याणम् |

# SANSKRIT PAPER 1

# संस्कृतम्

# (209)

**समय : होरात्रयम् ]** **[ पूर्णाङ्का: - 100**

---

निर्देशा : (1) अस्मिन् प्रश्नपत्रे द्विचत्वारिंशत् प्रश्नाः ।

(2) प्रत्येकं प्रश्नस्य समक्षम् अङ्काः सूचिताः ।

(3) सर्वे प्रश्ना: अनिवार्याः ।

---

**खण्ड – क**

1x10=10

1 गुरुगतां विद्यां क: अधिगच्छति ?

(A) ब्रह्मचारी (B) शुश्रूषुः

(C) परिश्रमी (D) मेधावी

2 मस्तिष्क: केन सबलं भवति ?

(A) दुग्धपानेन (B) मनोयोगेन

(C) भाग्येन (D) परिश्रमेण

3 'त्याज्यं न धैर्यम्" इति पाठे मकरी किम् खादितुमिच्छति ?

(A) वानरम् (B) वानरहृदयम्

(C) जम्बुफलानि (D) न किमपि

4 केन किम् न भवति ?

(A) वाचा भाषणम् (B) मनसा ध्यानम्

(C) श्रोत्राभ्यां श्रवणम् (D) नेत्राभ्यां श्वसनम्

5 कस्याः तीरे शबरी दृष्टा?

(A) गंगातीरे (B) यमुनातीरे

(C) सरयूतीरे (D) पम्पातीरे

6 शूलपाणि : इति कः कथ्यते?

(A) विष्णुः (B) शिवः

(C) इन्द्रः (D) सूर्यः

7 यक्षयुधिष्ठिरसंवादानुसारं किम् हित्वा प्रियः भवति ?

(A) क्रोधम् (B) मानम्

(C) कामम् (D) लोभम्

8 एतत् अव्ययं नास्ति?

(A) यद्यपि (B) प्रभूतम्

(C) सह (D) सर्वतः\

9 वयं कस्याः पुत्राः ?

(A) पृथिव्याः (B) आकाशः

(C) पातालः (D) सर्वः

10 'वृक्षः स्वयमातपे तिष्ठति' इति वाक्ये रेखांकितं पदं बहुवचने किं भविष्यति ?

(A) तिष्ठन्ति (B) तिष्ठतु

(C) तिष्ठतः (D) तिष्ठेत

11 मित्रस्य किमपि लक्षणद्वयं लिखत | 1+1= 2

12 (i) तपः किम् भवति ?

(ii) दमः कः प्रकीर्तितः? 1+1= 2

13 (i) चित्रकूटे कैकयीपुत्रः भरतः कम् प्रसादयितुम् आगतः?

(ii) प्रसन्नसलिला का आसीत्? 1+1= 2

14 अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नान् उत्तरत – 1x3=3

**कण्वः** - वत्से! अलं रुदितेन । स्थिरा भव। इतः पन्थानम् आलोकय । अस्मिन् नतोन्नते मार्गे ते

पदानि विषमीभवन्ति ।

**शाङ्गरवः-** भगवन्! ओदकान्तं स्निग्धो जनोनुगन्तव्यः इति श्रूयते। तदिदं सरस्तीरम् अत्र सन्दिश्यप्रति गन्तुमर्हति भवान्।

**कण्वः** - शकुन्तले ! त्वं गुरुन् शुश्रूषस्व, परिजनेषु उदारा भव। समृद्धिषु अगर्विताभव ।।

**प्रश्नाः**

(क) कण्वः कुत्र स्थित्वा शकुन्तलाम् उपदिशति ?

(ख) कण्वः शकुन्तलां किमुपदिशति ?

(ग) 'मार्गे' इति विशेष्यस्य किम् विशेषणम् अत्र प्रयुक्तम्?

15 कस्यचिदेकस्य चरित्रचित्रणं पञ्चवाक्येषु संस्कृतेन कुरुत - 1x5=5

लवः **अथवा** कण्वः ।

16 प्रश्नान् उत्तरत - 1+1=2

(क) विषदग्धेभ्यः शस्त्रेभ्यः भीता कस्य सेना पलायिता?

(ख) 'अपसरणम्' एव इतः उचितम् इति कः अकथयत्?

17 (क) पाषाणशिलाया गर्ताः कथं जाताः? 1+1=2

(ख) 'अहं मनोयोगेन पठिष्यामि ' इति कः कथयति ?

18 अधोलिखितं पद्यं पठित्वा प्रशनान् उत्तरत – 1+1=2

वृत्तं यत्नेन संरक्षेद् वित्तमेति च याति च ।
अक्षीणो वित्ततः क्षीणो वृत्ततस्तु हतो हतः ॥

(i) यत्नेन किम् संरक्षेत् ?

(ii) कस्मात् क्षीणः अक्षीणः भवति ?

19 अधोलिखितं पद्यं पठित्वा प्रश्नान् उत्तरत – 1+1=2

अविश्रमं वहेद् भारं शीतोष्णं च न विन्दति ।
ससन्तोषस्तथा नित्यं त्रीणि शिक्षेत् गर्दभात् ।।

(i) अस्मिन् पद्ये गर्दभस्य कति गुणाः कथिताः ?

(ii) गर्दभः विश्रामं विना किम् करोति ?

20 अधोलिखितं पद्यांशं पठित्वा प्रश्नान् उतरत- 1x3=3

अपदो दूरगामी च साक्षरो न च पण्डितः ।
अमुखः स्फुटवक्ता च यो जानाति स पण्डितः ।।

(i) दूरं गच्छति इति कृते किम् पदमत्र प्रयुक्तम् ?

(ii) निरक्षरः इत्यस्य किम् विलोमपदम् अत्र प्रयुक्तम् ?

(iii) अस्मिन् श्लोके किम् क्रियापदम् ?

21 अधोलिखित श्लोकस्य अन्वये रिक्तस्थानि पूरयत- 1x3=3

ताभिः सहोत्थितं शीघ्रं, विमानं प्रेक्ष्य राघवः।
ऋष्यमूकसमीपे तु वैदेहीं पुनरब्रवीत्।।

**अन्वयः** -

राघवः <u>1</u> सह शीघ्रम् उ त्थि तम् <u>2</u> प्रेक्ष्य ऋष्यमूकसमीपे तु <u>3</u> अब्रवीत्|

22 रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कुरुत – 1+1=2

(क) <u>लीलावती</u> भास्कराचार्यस्य पुत्री आसीत्।

(ख) सः <u>गणितस्य</u> जटिलप्रश्नान् स्पष्टीकृतवान्।

23 कः कं प्रति कथयति? 1+1=2

(क) आर्य! त्वर्यताम्। अस्मद्रथं तत्रैव नयतु।

(ख) सम्राजं सुतम् आप्नुहि ।

24 महात्मनः गांधिनः आश्रमस्य किं नाम ? आश्रमात् जनै का प्रेरणा प्राप्यते ? 1+1=2

25 अधोलिखित गद्यांशं पठित्वा प्रश्नान् उत्तरत – 1x3=3

आसीत् समुद्रसमीपे विशालः फलैः पूरितः जम्बुवृक्षः। तस्मिन् वृक्षे बलिष्ठो रक्तमुखनामकः वानरः वसति स्म। एकदा करालमुखः नामको मकरः वानरम् अपश्यत् अचिन्तयत् च यत् अयं वृक्षवासी स्वस्थः चञ्चलः निर्भीकः : इव प्रतिभाति । अयं मम सहचरो भवतु इति मत्वा प्रतिदिनं सस्नेहं वा र्ता करो ति । वानरः अपि कथयति यत् भवान् मम अतिथि :। भक्षयतु मधुराणि जम्बुफलानि ।

प्रश्नाः

(क) समुद्रतीरे फलैः पूरितः कः वृक्षः आसीत्?

(ख) भवान् मम अतिथि : इति कः कथयति ?

(ग) रक्तमुखनामकः वानरः वसति स्म इत्यत्र रेखांकित पदे कः लकारः?

26 अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नान् उत्तरत- 1x3=3

लीलावती भास्कराचार्यस्य पुत्री आसीत् । पुत्री शिक्षमाणः सः तस्याः कृते मनोविनोदंयुक्तं गणितं काव्यरूपेण अरचयत् । सः पशुपक्षिभ्रमरहंसादिमाध्यमेन गणितस्य जटिलप्रश्नान् अरचयत् तेषां समाधानं चापि अकरोत् । अतोऽयं ग्रन्थः लीलावती इति नाम्ना प्रसिद्धः|

प्रश्नाः

(1) भास्कराचार्यः कं ग्रन्थमरचयत् ?

(2) 'लीलावती' कस्य पुत्री आसीत् ?

(3) भास्कराचार्यः गणितस्य प्रश्नान् केषां माध्यमेन रचितवान् ?

27 कस्यचिदेकस्य पाठस्य सारांशं पञ्चवाक्येषु लिखत : 1x5=5

(i) त्याज्यं न धैर्यम्

(ii) यद्भविष्यो विनश्यति

(iii) कर्त्तव्यनिष्ठा

## खण्ड : - ख

## अनुप्रयुक्त व्याकरणम्

28 अधोलिखितानां वर्णानाम् उच्चारणस्थानानि लिखत – 1/2x4=2

ऋ, म, ष, झ |

29 रेखाङ्कितपदेषु सन्धिच्छेदं कृत्वा नाम लिखत- 1x3=3

सत्यमेवेश्वरो लोके, सत्ये धर्मः सदाश्रितः

सत्यमूलानि सर्वाणि, सत्यान्नास्ति परं पदम्

30 संधि कुरुत- 1+1=2

तत् + नूने प्रभातसमये मत्स्यजीविनः + अत्र समागत्य मत्स्यसंक्षयं करिष्यन्ति ।

31 रेखाङ्कितपदेषु कः मूलशब्दः का च विभक्तिः? 1+1=2

(क) लोभः महान् व्याधिः। ।

(ख) अथ त्वं मां कं मन्यसे?

32 रिक्तस्थानेषु अङ्कानां स्थाने संख्यावाचकपदानि लिखत- 1x3=3

(i) __5__ इन्द्रियाणि |

(ii) __2__ हस्तौ |

(iii) __4__ विद्वांसः |

33 (i) गुणैः परवशीभूताः व्यवर्धन्त सहस्रशः ।		1+1=2

(ii) हन्त ! प्रतिनिवर्तन्ते अस्माकं सैनिकाः । रेखाङ्कितपदयोः कः धातुः, कश्च लकारः ?

34 रेखाङ्कितपदयोः कः मूलशब्दः काच विभक्तिः ?		1+1=2

कः शत्रुर्दुर्जयः पुंसाम् ।

35 अधोलिखितयोः समस्तपदयोः विग्रहं लिखत -		1+1=2

(i) सुकलत्रः

(ii) बोधिद्रुमतले

36 रेखाङ्कितशब्दयोः उपसर्ग-प्रत्ययौ चित्वा पृथक् कुरुत-		1+1=2

(क) तपः किं लक्षणं प्रोक्तम्।

(ख) मातापित्रोः सेवा कर्त्तव्या ।

37 रिक्तस्थानपूर्तिं कुरुत-		1x3=3

(i) सिंहात्________ प्रकीर्तितम् । (एक)

(ii) सर्वतः सारमादघात्_______ इव षट्पदः । (पुष्प)

(iii) सर्वप्रथमं का_______ बहिः गता । (शरीर)

38 रिक्तस्थाने किं पदं भविष्यति ?		1+1=2

(i) अस्य योगदानं_____ वैज्ञानिकाः उपग्रह निर्मितवन्तः। (प्र + शंस् + शत्)

(ii) अनसूये! अलं _______ (रुद् + कत्वा)

**खण्ड – ग**

## रचनाकौशलम्

39 अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नान् उत्तरत -		1x5=5

संस्कृतभाषायां कथासाहित्यं तु महता प्रभाषेन दृश्यते । पञ्चतन्त्रं, हितोपदेशः, बृहत्कथा, सिंहासनद्वात्रिंशिका, कथासरित्सागरः इत्यादिषु रामायण महाभारत

पुराणादिषु च विस्तृत: कथाप्रवाह: दृश्यते। बौद्धधर्मे अपि जातककथादयः सुप्रसिद्धाः। लौकिक विषयम् अवलम्ब्य रचिता: जैन कथा: अपि अनेकाः सन्ति। नीति प्रवणता, आध्यात्मिकी प्रगति :, आत्मोन्नतिः इत्यादयः अंशाः एतासु कथासु प्राधान्यम् आवहन्ति। एतासु कथासु निबद्धा: श्लोकाः कथामाध्यमेन जीवन निर्माणस्य सन्देशं प्रयच्छन्ति। एष एव उपदेश: एतासां कथानाम् उद्देश्यम्।

प्रश्ना:

(1) विस्तृत: कथाप्रवाह: कस्मिन् महाकाव्ये दृश्यते ?

(2) जातककथाः कस्मिन् धर्मे सुप्रसिद्धाः?

(3) कथासु निबद्धा: श्लोका: कस्य सन्देशं प्रयच्छन्ति ?

(5) 'प्रभाषेन' इति पदस्य विशेषणं किम् ?

(5) 'संक्षिप्तः' इति पदस्य किम् विलोमपदमत्र प्रयुक्तम्?

40 अधोलिखितं विषयमधिकृत्य मञ्जूषापदसहायतया पञ्चवाक्येषु 5 एकमनुच्छेदं लिखत-

**शरीरमाद्यं खलु ध र्मसाधनम्**

**मञ्जूषा**

| |
|---|
| स्वास्थ्यं, शरीरस्य, आवश्यकम्, कार्यसम्पादनम्, जीवने सफलतायै, वरदानम्, दीर्घजीवनस्य कामना, स्वस्थं मनः, बु द्धिः, स्वस्थ: आत्मा जीवनम् आनन्दमयम्। |

41 विद्यालयात् अवकाशार्थं प्रधानाचार्यप्रति अधोलिखितं पत्रं मञ्जूषातः उचितपदानि गृहीत्वा पूरयत- 1x5=5

सेवायाम्.
मान्याः प्रधानाचार्याः.
कुलाची-हंसराज-मॉडल- विद्यालयः
अशोक- विहारः, दिल्ली।

महोदयाः

सविनयं (1) .................. इदम् अस्ति यत् (2) ................ अहं ज्वरेण (3) ................अस्मि| ज्वर- कारणात् अहं (4) ................ आगन्तुम् असमर्थः अस्मि । कृपया माम् (5) ................... अवकाशं प्रदाय अनुग्रहणन्तु।

भवदीय: शिष्यः,

अनुज:

**मञ्जूषा**

| दिनद्वयस्य, निवेदनम्, गतरात्रौ, पीडितः, विद्यालयम् |
|---|

42 अधोलिखितं चित्रं दृष्ट्वा पञ्च वाक्येषु वर्णनं कुरुत – 1X 5=5



**मञ्जूषा**

| बालिकाः, शिक्षिका, व्यजनानि , वातानुकूलनयन्त्रम्, आसन्दाः, उत्पीठिका तिष्ठन्ति , ध्यानेन श्रृण्वन्ति , विद्युत्-फलकम् (स्मार्टबोर्ड), महापुरुषाणां चित्राणि , अग्निशमनयन्त्रम् , भित्तौ , कक्षा |
|---|

# SANSKRIT PAPER 2

# संस्कृतम्

## (209)

समय : होरात्रयम् ]　　　　　　　　　　　　[ पूर्णाङ्का: - 100

---

निर्देशा : (1) अस्मिन् प्रश्नपत्रे द्विचत्वारिंशत् प्रश्नाः ।

(2) प्रत्येकं प्रश्नस्य समक्षम् अङ्काः सूचिताः ।

(3) सर्वे प्रश्ना: अनिवार्याः ।

---

### खण्ड – क

1 प्रेरणापाठानुसारं शिलाखण्डे के आसन् ?　　　　1x10=10

(A) महिलाः　　(B) बालकाः

(C) गर्ताः　　(D) तृणानि

2 प्राणादिषु कः श्रेष्ठः सिद्धः ?

(A)चक्षुः　　(B)मनः

(C) प्राणाः　　(D) श्रोत्रम्

3 एषः शुनः गुणः अस्ति ?

(A) अल्पभोजी　　(B) स्वल्पसन्तुष्टः

(C) सुन्द्रि :　　(D) स्वामिभक्तः

4 भूमेः गुरुतरा का अस्ति?

(A) माता　　(B) पिता

(C) गुरु　　(D) ईश्वरः

5 सुरक्षितं देवहतं ... .....

(A) तिष्ठति (B) जीवति

(C) विनश्यति (D) प्रसीदति

6 जानासि ' इति क्रियापदस्य उत्तमपुरुषे किं रुपं भविष्यति ?

(A) जानामि (B) ज्ञातम्

(C) जानीमः (D) जानाति ।

7 एतत् पदम् अव्ययम् नास्ति?

(A) च (B) न

(C) वा (D) सः

8 वाचा' इति पदे का विभक्ति ?

(A) प्रथमा (B) द्वितीया

(C) तृतीया (D) चतुर्थी

9 आनन्दयति इति पदस्य बहुवचने किं भवति ?

(A) आनन्दयति (B) आनन्दयेते

(C) आनन्दयतः (D) आनन्दयन्ति

10 एषा सा दृश्यते सीता? इति सा शब्दे का विभक्ति?

(A) पंचमी (B) षष्ठी

(C) प्रथमा ( D) सप्तमी

11 धर्मस्य किमपि लक्षणद्वयं लिखत ? 2

12 (i) क्षितेः किम् अन्वशिक्षम्?

(ii) षट्पदः पुष्पेभ्यः किम् गृह्णाति ? 1+1= 2

13 (i) तक्रं कस्य अन्ते पेयम्?

(ii) घटः किम् धारयति ? 1+1= 2

14 अधोलिखितं नाट्यांशं पठि त्वा प्रदत्तप्रश्नान् उत्तरत – 1x3=3

(ततः प्रविशति सुमन्त्रेण सह रथारूढः चन्द्रके तुः)

**चन्द्रकेतुः**- आर्य! एका कि नं लवम् उद्दिश्य बहूनां युद्धारम्भः इति लज्जते मे हृदयम्।

**सुमन्त्रः** - वत्स! समस्तसैन्यदलम् अपि लवसमक्षं योद्धम् नालम्।

**चन्द्रकेतुः**- (सविस्मयम्) हन्त! प्रति निवर्तन्ते अस्माकं सैनिकाः। आर्य। त्वर्यताम्, त्वर्यताम्! अस्मद्रथं तत्रैव नयतु।

(i) चन्द्रकेतु: किमर्थं लज्जितः इव अनुभवति ?

(ii) चन्द्रकेतु : कं रथं युद्धस्थले नेतुम् आदिशीत ?

(iii) चन्द्रकेतोः सैनिकैः सह कस्य युद्धम् भवति ?

15 कस्यचिदेकस्य चरित्रचित्रणं पञ्चवाक्येषु संस्कृतेन कुरुत - 1x5=5

दौवारिकः अथवा चन्द्रकेतुः

16 प्रश्नान् उत्तरत - 1+1=2

(क) अभिवादिनशीलस्य कानि चत्वारि वर्धन्ते ?

(ख) मकरी किम् खादितुम् इच्छति ?

17 आकाशात् कः उच्चतरः ? वातात् च किं शीघ्रतरमम् ? 1+1=2

18 अधोलिखितं पद्यं पठित्वा प्रशनान् उत्तरत – 1+1=2

क्रोधः सुदर्जयः शत्रुः लोभो व्याधिरनन्तकः

(i) लोभः कीदृशः शत्रुः वर्णितः ?

(ii) लोभः कीदृशः व्याधि ?

19 अधोलिखितं पद्यं पठित्वा प्रश्नान् उत्तरत – 1+1=2

असौ सुतनु! शैलेन्द्रः चित्रकूटः प्रकाशते।
अत्र मां कैकयीपुत्रः प्रसादयितुमागतः

(i) कैकयीपुत्रः कम् प्रसादयितुमागत?
(ii) 'शैलेन्द्रः चित्रकूट:' इत्यत्र किम् विशेषणपदम्?

20 अधोलिखितं पद्यांशं पठित्वा प्रश्नान् उतरत- 1x3=3

स्वस्ति पन्थानमनुचरेम सूर्या चन्द्रमसाविव ।
पुनर्ददताऽदध्ना ज्यनता संगमेमहि ॥

(i) वयं कीदृशं पन्थानम् अनुचरेम ?
(ii) कौ सर्वदा सर्वेषां हितं कुरुतः ?
(iii) वयः कैः सहसंगति कुर्याम् ?

21 अधोलिखित श्लोकस्य अन्वये रिक्तस्थानि पूरयत- 1x3=3

आत्मवत् सर्वभूतानि पश्यतोऽस्य पदागुना : ।
गुणैः परवशीभूता व्यवर्धन्त सहत्रश ।।

**अन्वय :**

आत्मवत् ....1...... पश्यतः अस्य गुणै : ....2...... पदानुगाः सहत्रंश ..3... I

22 रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कुरुत – 1+1=2

(क) <u>चिन्ता</u> बहुतरी तृणात् ।
(ख) <u>रामस्य</u> पितुं ! राजधानी अयोध्या अस्ति ।

23 क: कं प्रति कथयति? 1+1=2

(क) को नु खल्वेष में वस्त्रे सज्जते|
(ख) परिरक्ष सम्यक् गरुडनीडानि|

24 मृजया रक्ष्यते रुपं , कुल वृत्तेन रक्ष्यते । 1+1=2

(i) रुपस्य रक्षा कया ?
(ii) कुलस्य रक्षा कथं भवति ?

25 अधोलिखित गद्यांशं पठित्वा प्रश्नान् उत्तरत – 1x3=3

एकदा बोधिसत्त्व: स्वपुण्यप्रभावात् दानसंयमकरुणादिभि: गुणैरलङ्कृतः देवानामधिपः शक्र: अभवत्। तस्य प्रासादे राजलक्ष्मी: शशिन: प्रभेव अधिकम् अराजत। नानासुखभोगसमन्वि ताऽपि लक्ष्मीः तस्य हृदयं दर्पमलिनं नाकरोत्।

(क) लक्ष्मीः कस्य हृदयं दर्पमलिनं नाकरोत्?
(ख) कस्य प्रासादे राजलक्ष्मी: शशिन: प्रभेव अधिकम् अराजत?
(ग) देवानामधिपः क: अभवत्?

26 अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नान् उत्तरत- 1x3=3

आसीद् बंगदेशे बोपदेवः नाम कश्चिद बालकः। सः विद्यालये पाठ्य विषयाणाम् अवबोधने स्मरणे च नितांन्तम् आसीत्। असौ प्रायः चिन्तयति स्म यत् अन्ये छात्राः सर्वान् विषयान् शीघ्रं अवगच्छन्ति , लिखन्ति स्मरन्ति च किन्तु मन्दबुद्धिः अहं तान् न अवगच्छामि । किमर्थम् अहम् अत्र समयं वृथा नाशयामि ।

(i) बोपदेवः कस्मिन् देशे आसीत्?

(ii) के सर्वान् विषयान् शीघ्रं अवगच्छन्ति स्म?

(iii) मन्दबुद्धिः कः आसीत्?

27 कस्यचिदेकस्य पाठस्य सारांशं पञ्चवाक्येषु लिखत : 1x5=5

(i) प्रेरणा

(ii) प्राणस्य श्रेष्ठत्वम्

(iii) कर्त्तव्यनिष्ठा

## खण्ड : - ख

## व्याकरणम् अनुप्रयुक्त

28 अधोलिखितानां वर्णानाम् उच्चारणस्थानानि लिखत – 1/2x4=2

र, ब, श, क

29 रेखाङ्किकतपदेषु सन्धिच्छेदं कृत्वा नाम लिखत- 1+1=2

(i) पितेव आश्रमवासिनाम्

(ii) विराजते मुनिर्बुद्धो।

30 संधि कुरुत- 1x3=3

(i) यत्ते मध्यं पृथिवि ! यत् + च नभ्यम्।

(ii) माता भूमि: पुत्रः + अहं पृथिव्याः

(iii) किम् + नु हित्वा प्रियः भवति ।

31 रेखांकितपदयोः कौ मूलधातू क: च लकार: ? 1+1=2

(i) त्रीणि शिक्षेत गर्दभात्।

(ii) चत्वारि तस्य वर्धन्ते।

32 रिक्तस्थानेषु अङ्कानां स्थाने संख्यावाचकपदानि लिखत- 1x3=3

(i) <u>10</u> पुत्रसमो द्रुमः |

(ii) वृते <u>4</u> चटकाः उपविष्टाः |

(iii) सः <u>1</u> नेत्रेण पश्यति|

33 <u>माता</u> भूमिः पुत्रोऽहं <u>पृथिव्याः</u> इति रेखाङ्कितपदयोः कः मूलशब्दः का च विभक्तिः ? 1+1=2

34 रेखाङ्कितपदयोः कः धातुः कश्चलकारः ? 1+1=2

(i) <u>त्यज</u>जपमालां ।

(ii) सलीलमीशः <u>सृजति</u> भुवम् ।

35 अधोलिखितयोः समस्तपदयोः विग्रहं लिखत - 1+1=2

(i) सुकलत्रः

(ii) बोधिद्रुमतले

36 रेखाङ्कितशब्दयोः उपसर्ग-प्रत्ययौ चित्वा पृथक् कुरुत- 1+1=2

(i) आगच्छ <u>दुर्गाध्यक्ष</u> समीपे।

(ii) वयं <u>गिरिकन्दरेषु</u> विचरामः ।

37 रिक्तस्थानपूर्तिं कुरुत- 1x3=3

(क) माता ______ प्रति वदति। ( पुत्र )
(ख) ______उभयतः वृक्षाः सन्ति। ( विद्यालय)
(ग) त्वं______ सह क्रीडसि। ( मित्र )

38 रिक्तस्थाने किं पदं भविष्यति ? 1+1=2

(i) नीडानि _____एव स करुणापरः तानि रक्षितुम् आदिशति। (दृश् + क्त्वा)

(ii) _______आपदां सघृण एव तु मध्यबुद्धिः । (प्र + आप् + ल्यप्)

## खण्ड – ग

## रचनाकौशलम्

39 अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नान् उत्तरत –

हिमालय पर्वते अनेकानि दर्शनीय स्थानानि सन्ति । तत्र प्रतिवर्ष भक्ताः श्रद्धालवश्च गत्या बद्रीनाथ-केदारनाथादिषु मंदिरेषु भगवद्दर्शनं कुर्वन्ति । अद्यापि अनेकासु गुहासुमुनयः उषित्वातपः तपन्ति । अतः हिमालयस्य महत् गौरवं वर्तते। कस्य रक्षणे एव भारतस्य रक्षास्ति वयं प्रतिज्ञा कुर्मः यत् आवश्यकतायां सत्याम् अस्य रक्षा रं्थ प्राणान् अपि त्यक्ष्यामः।
प्रश्नाः

(1) अनेकानि दर्शनीयानि स्थानानि कस्मिन् पर्वते सन्ति ?
(2) भक्ताः कुत्र गत्वा भगवद्दर्शनं कुर्वन्ति?
(3) मुनयः कु त्र उषित्वा तपः कुर्वन्ति ?
(4) कस्य रक्षणे एव भारतस्य रक्षास्ति ?
(5) 'प्राणान्' इति शब्दे का विभक्ति : ?

40 अधोलिखितं विषयमधिकृत्य मञ्जूषापदसहायतया पञ्चवाक्येषु एकमनुच्छेदं लिखत- 5

**उद्यमेनैव सिध्यन्ति कार्याणि न मनोरथैः**

**मञ्जूषा**

| |
|---|
| उद्यमेन, छात्रः, उत्तीर्णः, आलस्यं, महारिपुः, भोजनं, मुखे, नैव, जनाः, महापुरुषाः, परिश्रमेण, सुव्यवस्थितं, जीवनं, समीपस्य, ईश्वरः, सहायकः अनुसन्धानानि , वैज्ञानिकानि , प्रगति :, संसार |

41 भवान् दीपकः। भवतां मित्रं रमेश: अन्यस्मिन् नगरे वसति । तं प्रति नव वर्षस्यागमेशुभकामनाः मंजूषायां प्रदत्तैः शव्दैः रिक्तस्थाना नि पूरयित्वा प्रेषयतु।

द्वारकानगरम्
तिथि :-
प्रिय मित्र रमेश,
सप्रेम नमस्ते।
नववत्सरोऽयं तव (1) .................... प्रतिदिनं सौख्यं (2) ..................
समृद्धि (3) .....................च पूरयेत्। गृहे (4) .................. परिवारजनानां कृतेऽपि नववर्षस्य
(5) ................. स्युः।

तव सुहृत्,
दीपकः

| मञ्जूषा |
|---|
| सफलतां, पूरयेत्, जीवने, नवतां, सवेर्षां शुभकामनाः |

42 अधोलिखितं चित्रं दृष्ट्वा पञ्च वाक्येषु वर्णनं कुरुत – 1x5=5



**मञ्जूषा**

| |
|---|
| परीक्षाभवनम्, दत्तचित्तछात्रा, निरीक्षकद्वयम्, उत्तरपुस्तिका वितरणम्, प्रश्नपत्राणां वितरणम्, भित्तौ घटिका, सार्धनववादनम्, बालकानां स्यूतादयः, कोष्ठात् बहि : |

## SANSKRIT PAPER 3

## संस्कृतम्

## (209)

समय :होरात्रयम् ] [ पूर्णाङ्का: -100

---

निर्देशा : (1) अस्मिन् प्रश्नपत्रे द्विचत्वारिंशत् प्रश्नाः ।

(2) प्रत्येकं प्रश्नस्य समक्षम् अङ्काः सूचिताः ।

(3) सर्वे प्रश्ना: अनिवार्याः ।

---

### खण्ड – क

1x10=10

1.वायोः अधिकं गतिशीलम् किमस्ति ?

( A ) मित्रम् ( B ) मुखम्

( C ) मनः ( D ) सहिष्णुत्वम्

2.' स्नानेन बहवः रोगाः नश्यन्ति ' इत्यत्र ' बहवः ' इति पदे का विभक्तिः ?

( A ) प्रथमा ( B ) द्वितीया

( C ) पंचमी ( D ) षष्ठी

3.' विविधायुधैः सुसज्जितः महासत्त्वः ' इत्यत्र किं विशेषणपदम् ?

( A ) विविधायुधैः ( B ) महासत्त्व

( C ) सुसज्जितः ( D ) सज्जितः

4.' दौवारिकः प्रभुवर्यस्य आदेशं पालयति ' इत्यत्र रेखांकितपदे कः लकारः ?

(A) लङ्  (B) लोट

(C) विधिलिङ्  (D) लट्

5' वैदिकमन्त्रेपु सर्वमानवकल्याणभावना विद्यते ' इत्यत्र रेखांकितस्य बहुवचनं भविष्यति

(A) विद्येते  (B) विद्यन्ते

(C) विद्यथे  (D) विद्यध्वे

6.यक्षयुधिष्ठिरसंवादानुसारं किं हित्वा प्रियः भवति ?

(A) क्रोधम्.  (B) कामम्

(C) मानम्  (D) लोभम्

7.अस्मिन् पदे एव ' ल्यप् ' प्रत्ययः नास्ति

(A) संयम्य.  (B) आगत्य

(C) शब्दापय  (D) प्रविश्य

8.एतत् पदम् अव्ययम् नास्ति

(A) च  (B) न

(C) सः  (D) वा

9.' सदाचारः ' इति पाठे पण्डितबुद्धयः नराः कथं न व्यवहरन्ति ?

(A) नष्टं न शोचन्ति  (B) आपत्सु न मुह्यन्ति

(C) वृत्तं यत्नेन रक्षन्ति  (D) अप्राप्यं वाञ्छन्ति

10.गर्दभे एषः गुणः नास्ति

( A ) सन्तोषः.          ( B) भारवहनम्

( C ) इन्द्रियसंयमः          ( D ) शीतोष्णसहनम्

11. तेजसां हि न वयः समीक्ष्यते इति पाठः कस्मात् ग्रन्थात् संकलित : ? कश्च तस्य लेखकः ?    2

12 ततस्तीरे सबर्मत्या नाम्ना सत्याग्रहाश्रमः    1+1=2

महात्मा स्थापयामास सदनं सानुयात्रिकः ॥

i) सत्याग्रहाश्रमः कस्या नद्याः तीरे अस्ति ?

ii ) सत्याग्रहाश्रम : . कः स्थापयासाम?

13 के शकुन्तलायाः सख्यौ ?    2

14 अधोलिखितम् नाट्यांश पठित्वा प्रदत्त प्रश्नान् उत्तरत -    1x3=3

**दौवारिकः** - ( संन्यासिनो हस्तं धृत्वा ) इतस्तावत् सत्यं कथय कस्त्वम् ? कुतः आयातः केन वा प्रेषितः ?

**संन्यासी** - ( स्मित्वेव) अथ त्वं मां मन्यसे ?

**दौवारिकः** - कस्याप्यन्यस्य ना गूढचरं मन्ये ।

तदादेशं पालयिष्यामि प्रभुवर्धस्य ॥

**संन्यासी** - त्यज ! नाहं पुनरायास्यामि । दयस्व , दयस्व ।

**प्रश्नाः –**

i) दौवारिकः संन्यासिनम् कं मन्यते?

ii ) संन्यासी दयायै कं प्रार्थयति ?

iii) मन्यसे इति क्रियापदस्य कर्तृपदं किम् ?

15 अधोलिखितयोः एकस्य . चरित्र चित्रण पंचवाक्येषु संस्कृतेन लिखत - 1x5=5

शकुन्तला **अथवा** कुशः

16 तस्मात्सखा त्वमसि यन्मम तत्त्वेव । 1+1=2

i) किं क्रियापदम् ?

ii ) त्वम् इति सर्वनामपदम् कस्मै प्रयुक्तम् ?

17 आकाशात् कः उच्चतरः ? वातात् च किं शीघ्रतरम् ? 1+1=2

18 स्नानात् के लाभाः ? स्नानं कदा च करणीयम्? 1+1=2

19 तत्रास्तीशः कठिनां भूमिं यत्र हि कर्षति लांगलिकः इत्यत्र ईशः कुत्र तिष्ठति ? 1+1=2

20 जीवनम् सर्वप्राणिनाम् जलाशयसुनिर्भरम् । 1+1=2

संरक्ष्यं वर्धनीयं च जलम् रक्षति रक्षितम् ॥

(1) किमर्थ जलं रक्षणीयम् ?

(2)केषां जीवनं जलाशय सुनिर्भरम् ?

21 अधोलिखित शलोकस्य अन्वये रिक्तस्थानि पूरयत - 1x3=3

नाप्सु मूत्रं पुरीषं वा, ष्ठीवनम् वा समत्सृजेत् ।

अमेध्यालिप्तमन्यदा लोहितं वा विषाणि वा ॥

**अन्वय –**

मूत्रम् ____1______ वा ष्ठीवनम् लोहितम् _____2______ अमेध्यालिप्तम् अन्यत् वा ___3____ न समृत्सृजेत् ।

22 रेखांकित पदयोः प्रश्न निर्माण कुरुत - 1+1=2

(i). इयं स दृश्यते <u>गंगा</u> ।

(ii) <u>रामस्य</u> पितुः नामः दशरथः अस्ति ?

23 (i)प्राणानां श्रेष्ठता कथं सिध्यति ? 1+1=2

(ii)न वयं शिवगणास्तादृशां : ? इति अत्र " वयम् " सर्वनामपदं कस्मै प्रयुक्तम् ।

23 . अहो सत्यमभिहितं भवता । ममाप्यभीष्टमेतत् । तदन्यत्र गम्यताम् ' इति प्रत्युत्पन्नमतिः कं मत्स्यम् कथयति ? तौ मत्स्यौ केषां भयात् सरः त्यक्तुत्यक्तुमुद्यतौ? 1+1=2

24. तदहं न यास्यामि । भवद्भ्यां च यत्प्रतिभाति तत्कर्तव्यम् इति ' यद्भविष्यो विनश्यति ' पाठे यदभविष्य : किमर्थ सरः त्यक्तुं न इच्छति ? तस्य कः अन्तः भवति ? 1+1=2

25. अधोलिखितगद्यांशं पठित्वा प्रश्नान् उत्तरत- 1x3=3

लीलावती भास्कराचार्यस्य पुत्री आसीत् । पुत्री शिक्षमाणः सः तस्याः कृते मनोविनोदयुक्त गणितं काव्यरूपेण अरचयत् । सः पशुपक्षिभ्रमरहंसादिमाध्यमेन गणितस्य जटिलप्रश्नान् अरचयत् तेषां समाधान चापि अकरोत् । अतोऽयं ग्रन्थः ' लीलावती ' इति नाम्ना प्रसिद्धः ।

**प्रश्नाः** ( i ) ' लीलावती ' इति पुस्तकं गद्ये अस्ति पद्ये वा ?

( ii ) ' लीलावती ग्रन्थे ' इति कस्य विषयस्य प्रश्नाः सन्ति ?

( iii ) गणितस्य प्रश्नाः कान् आधारीकृत्य निर्मिताः ?

26. भो मूर्ख ! न कोऽपि जीवः हृदयं विना जीवति । न वा तत् पृथक् कर्तुं शक्यते । अतः त्वं गच्छ पत्नी च प्रीणय- समाप्ता आवयोः मैत्री|

इति अंशः कस्मात् पाठात् संगृहीतः ?

अत्र कयोः मैत्री समाप्ता किञ्च तत्र कारणम्
आसीत्?

27. कस्यचित् एकस्य पाठस्य सारं पञ्चवाक्येषु लिखत- 1x5= 5

( i ) कर्त्तव्यनिष्ठा

( ii ) प्रेरणा

( iii ) प्राणस्य श्रेष्ठत्वम्

## खण्ड : - ख

## अनुप्रयुक्त व्याकरणम्

28. अधोलिखितेषु मूर्धन्य वर्णौ चित्वा लिखतः - 1+1=2

क्, ऱ्, ह्, ड्, ट्, द्

29 रेखांकित पदेषु सन्धि कुरुत नामानि च लिखत - 1+1=2

कः शत्रुर्दुर्जय पुंसाम् कश्च व्याधिरनन्तकः ।

30 . सन्धि कुरुत - 1x3=3

i) प्र + उक्तम्

(ii) साधुः + असाधुः

(iii) दमः +च

31 मानं हित्वा प्रियो भवति, क्रोधम् हित्वा न शोचति इति । 1+1=2

रेखांकित पदयोः कः मूलशब्दः का च विभक्तिः ?

32 रिक्तस्थानेषु अंकानां स्थाने संख्यावाचक पदानि लिखत - 1x3=3

1) __2__ नेत्रे

2) __5__ गजाः

3) __9__ फलानि

33 कामं हित्वार्थवान् भवति , लोभं हित्वा सुखी भवेत् 1+1=2

रेखांकित पदयोः कः धातुः कश्च लकारः ?

34 मित्रस्य चक्षुषा समीक्षामहे । रेखांकित पदयोः कः मूलशब्द: का च विभक्ति ? 1+1=2

35 अधोलिखितेषु समस्तपदयोः विग्रहं लिखत - 1+1=2

1) अनन्तकः

2) निर्दयः

36 अधोलिखितेषु विग्रहाणां समस्तपदयोः लिखत - 1+1=2

i ) शान्ति: प्रिया यस्य सः।

ii ) दर्पात् मलिनम् ।

37 रिक्तस्थाने किं पदं भविष्यति ? 1+1=2

i) सर्वै सह ( मिल् + क्त्वा) ......... ।

ii ) सर्वेषु प्राणिषु मैत्रीभावः धृ + तव्यत् ....... ।

38 रिक्तस्थान पूर्ति कुरुत - 1+1=2

i ) मा गृधः ....... धनम् । ( किं )

ii ) इदं सर्वे ........ ईशावास्यम् । ( जगतः)

## खण्ड – ग

## रचनाकौशलम्

39 अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नान् उत्तरत्. 1x5=5

जन्मभूमि: अस्मान् जननीवत् संरक्षति । अस्याः अन्नेन, जलेन, फलादीनां रसैश्च अस्माकं परिपालनं भवति कर्पासेन निर्मितैः वस्त्रैः अस्माकं शरीरं सुरक्षितं भवति । अस्मिन्नेव धरातले गृहाणि निर्माय वयं ससुखं वसामः । इयं जन्मभूमि: मातुरप्य धिकम् उपकरोति । एषा यावज्जीवं पालयति पोषयति च । भारतवर्षम् अस्माकं मातृभूमि: जन्मभूमिश्च । इयम् अस्माभि: अहर्निशं पूजनीया, रक्षणीया, वन्दनीया च अस्याः सौन्दर्यं तु अद्भुतम् एव । नदीभि: इयं सुजला । शस्यश्यामला च । देवताः अपि अस्याः गीतानि गायन्ति |

प्रश्नाः -

(1) अस्माकं शरीरं केन निर्मितैः वस्त्रैः सुरक्षितं भवति ?

(2) वयं कुत्र गृहाणां निर्माणं कुर्मः ?

(3) काः अस्याः गीतानि गायन्ति ?

(4) 'संरक्षति ' इति क्रियापदस्य कर्तृपदं किम् ?

(5) 'इयम् अस्माभि: अहर्निशं पूजनीया' इति वाक्ये 'इयम्' सर्वनामपदं कस्यै प्रयुक्तम् ?

40. अधोलिखितविषयम् अधिकृत्य मञ्जूषापदसहायतया पञ्चवाक्येषु एकम् अनुच्छेदं लिखत्- 5

## अनुशासन

| मञ्जूषा |
|---|
| जीवनस्य विकासाय, समाजस्य, अस्माकं विद्यालयस्य, व्यवहारेषु, देशस्य, परिवारस्य, आत्मिक उन्नति , लोक कल्याणम् |

41. भ्रातुः विवाह-अवसरे स्वमित्रस्य निमन्त्रणार्थम् अधोलिखितम् पत्र मञ्जूषायाः सहायतया पूरयत ।

1X5=5

गांधीनगरम्

दिल्ली।

दिनांकः

प्रि य मि त्र सक्षम!

सप्रेम नमो नमः।

अत्र कु शलं तत्र अस्तु। एतद् 1 ................ भवान् अतीव प्रसन्नो 2.................. यत् मम ज्येष्ठ-भ्रातुः विवाहः अग्रिम-मासस्य पञ्चम्यां तिथौ निश्चितः। भवतः परिवारेण सह 3 ............... अनिवार्या। गृहे माता-पित्रोः 4................ मम प्रणामः। भवतः 5....................प्रतीक्षायाम्।

भवदीयं मि त्रम्

सूर्यः

**मञ्जूषा**

| भविष्यति , आगमनस्य, चरणयोः, उपस्थितिः , ज्ञात्वा |
|---|

42.अधोलिखितं चित्रं दृष्ट्वा मञ्जूषापदसहायतया पञ्च वाक्यानि लिखत

1x5=5



| मंजूषा |
|---|
| जंत्वागारः, सिंहदम्पती, सिंहशावकौ, बालकः बालिका, मात्रा सह, पित्रा सह, अवलोकयन्ति, |
| जलपात्रम्, भोजनपात्रम् |

# SANSKRIT PAPER 4

# संस्कृतम्

# (209)

**समय : होरात्रयम् ]** **[ पूर्णाङ्का: - 100**

---

निर्देशा : (1) अस्मिन् प्रश्नपत्रे द्विचत्वारिंशत् प्रश्नाः ।

(2) प्रत्येकं प्रश्नस्य समक्षम् अङ्काः सूचिताः ।

(3) सर्वे प्रश्ना: अनिवार्याः ।

---

**खण्ड – क** 1x10=10

1. एतत् धर्मस्य लक्षणं नास्ति?
   (A) धृतिः (B) मनः
   (C) धीः (D) शौचम्

2. रक्तमुखः वानरः___वसति स्म ।
   (A) कूपसमीपे (B) स्थले
   (C) जम्बुवृक्षे (D) तडागे

3. कुक्कुटे एषः गुणः नास्ति?
   (A) आपद्गतां स्त्रियं त्यजेत् (B) प्रातः उत्थानम्
   (C) बन्धुभिः सह भोजनम् (D)युद्धम्

4 शरीरायासजननं कर्म क: उच्यते?
   (A) व्यायाम: (B) स्वप्न:
   (C) अभ्यंग: (D) क्षय:

5 बोपदेवः किम ग्रन्थम् अरचयत् ?

(A) व्याकरणम् (B) मुग्धबोधव्याकरणम्

(D) बोधव्याकरणम् (D) बालबोधव्याकरणम्

6 खगालयाः कीदृशैः पक्षिशावकै: युक्ताः ?

(A) जातपक्षै: (B) चलनोन्मुखैः

(C) अजातपक्षैः (D) पक्षहीनैः

7 शूलपाणि : इति कः कथ्यते?

(A) विष्णुः (B) शिवः

(C) इन्द्रः (D) सूर्य:

8 क: पुरुष: जीवने सम्मानं प्राप्नो ति ?

(A) शत्रु: (B) दुश्चिरत्र

(C) लालसायुक्त जन: (D) कर्तव्यनिष्ट:

9 सर्वप्रथमं का शरीरात् ब हि : गता?

(A) चक्षु: (B) वाक्

(C) मन: (D) श्रोत्र:

10 दिनस्य अन्ते रात्रौ किम् पिबेत्?

(A) जलम् (B) दुग्धम्

(C) नारिकेलजलम् (D) तक्रम

11 अभिवादनशीलस्य कानि चत्वारि वर्धन्ते? 1+1= 2

12 वानरस्य चत्वारि विशेषणपदानि लिखत। 1+1= 2

13 (i) कौ मत्स्यौ सुखम् एधेते?

(ii) कस्य नाश: भवति ? 1+1= 2

14 अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नान् उत्तरत – 1x3=3

**कण्व:** कोकिलास्वरेण वृक्षैः अनुमति : प्रदत्ता |

**शकुन्तला :** आश्रमपदं प रि त्यजन्त्याः मे चरणौ दुःखेन पुरतः प्रवर्तते।

**प्रियवंदा :** न केवलं तपोवन विरहकातरा सखी एव। त्वया उपस्थित वियोगस्य

तपोवनस्य अपितावत् समवस्था दृश्यते।

**प्रश्नाः**

(क) कोकिल स्वरेण कैः अनुमतिः प्रदत्ता ?

(ख) शकुन्तला प्रस्थान समये तपोवन वनस्पतयः कीदृशाः अभवन्?

(ग) 'प्रवर्तते' इति शब्दे कः लकारः ?

15 कस्यचिदेकस्य चरित्रचित्रणं पञ्चवाक्येषु संस्कृतेन कुरुत - 1x5=5

चन्द्रकेतुः **अथवा** शकुन्तला

16 प्रश्नान् उत्तरत - 1+1=2

(क) अस्माकम् समानाः एव के जिघ्रन्ति ?

(ख) दशकूपसमा का अस्ति ?

17 (क) बोधिसत्त्वः कीदृशैः गुणैः विभूषितः शक्रः अभवत् ? 1+1=2

(ख) शान्तिप्रियः शक्रः किमर्थ युद्धाय तत्परः अभवत्?

18 अधोलिखितं पद्यं पठित्वा प्रशनान् उत्तरत – 1+1=2

निर्ममो नित्यसत्त्वस्थो मिताशी सुस्मिताननः।
सुकलत्रः शिशुप्रेमीभि तेवाश्रमवासिनाम्।।

(1) सुकलत्र कः आसीत् ?

(2) आश्रमवासिनाम् कः पिता इव आसीत्?

19 अधोलिखितं पद्यं पठित्वा प्रश्नान् उत्तरत – 1+1=2

ईशस्तिष्ठति वर्षातपयोस्ताभ्यां सार्ध मलिनवपुः
दूरे क्षिप तव शुद्धां शाटीमे हि स इव पांसुरभू मिम् ।।

(क) ईशः कीदृश वपुः अस्ति ?

(ख) सः काभ्यां सार्ध तिष्ठति ?

20 अधोलिखितं पद्यांशं पठित्वा प्रश्नान् उतरत- 1X3=3

दशकूपसमा वापी दशवापीसमो ह्रदः।
दशह्रदसमः पुत्रः दशपुत्रसमो द्रुमः।।

xxx

(i) कः दशकूपः समः अस्ति ?

(ii) द्रुमः कति पुत्रसमः अस्ति ?

(iii) दशह्रद समो कः अस्ति ?

21 अधोलिखित श्लोकस्य अन्वये रिक्तस्थानि पूरयत- 1x3=3

सार्थ: प्रवसतो मित्रं भार्या मित्रं गृहे सतः।।

आतुरस्य भिषङ् मित्रं दानं मित्रं मरिष्यतः ॥

**अन्वयः-**

प्रवसतः __1__ मित्रम्, गृहे सतः मित्रम् __2__, आतुरस्य मित्रम् भिषक्, मरिष्यतः च मित्रम् __3__ ।

22 रेखाङ्किकतपदमाधृत्य प्रश्ननिर्माणं कुरुत – 1+1=2

(क) ते श्वः प्रभाते <u>मत्स्यसंक्षयं</u> करिष्यन्ति ।

(ख) <u>भवता</u> सत्यम् अभिहितम्।

23 क: कं प्रति कथयति? 1+1=2

(क) सत्यमैक्ष्वाक: खल्वसि ।

(ख) एकस्तावदयं: वीरपुरुष: पूजितो भवति|

24 सत्यमेवेश्वरो लोके सत्ये धर्मः सदाश्रितः । 1+1=2

सत्यमूलानि सर्वाणि सत्यान्नास्ति परं पदम् ||

(i) धर्म: सदा कुत्र आश्रित: ?

(ii) सत्यात् परं किम् नास्ति ?

25 अधोलिखित गद्यांशं पठित्वा प्रश्नान् उत्तरत – 1x3=3

ततः बालक: बोपदेवः प्रसन्नेन मनसा विद्यालयम् आगच्छति अवहितेन मनसा पाठं पठति , लिखति स्मरति च। छात्रैः सह चर्चामपि करोति । क्रमश तस्य बुद्धिः विकासं प्राप्नोति | अध्यापकाः तस्मिन् स्नेहम् अकुर्वन् छात्राः च तस्य सम्मानम् अकुर्वन्। कालान्तरे सः महान् विद्वान् अभवत् बालानां सुखबोधाय च मुग्ध-बोधव्याकरणम् अरचयत् ।

(i) क: प्रसन्नेन मनसा विद्यालयम् आगच्छति ?

(ii) कस्य बुद्धि: विकासं प्राप्नोति ?
(iii) मुग्ध-बोधव्याकरणम् क: अरचयत्?

26 अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नान् उत्तरत- 1x3=3

**दौवारिकः-** हहो! कपटसन्यासिन्! कथं विश्वासघात स्वामिवञ्चनं च शिक्षामा हे के चनान्ये भवन्ति ये उत्कोचलोभेन स्वामिनं वञ्चयित्वा तमसि पातयन्ति । न वयं शिवगणास्तादृशा:।
(संन्यासिनो हस्त धृत्वा) इतस्तावत् सत्य कथव आयात:? केन वा प्रेषित:?
**संन्यासीः** ( स्मित्वेव) अथ त्वं क मन्यसे?
**दौवारिकः** कस्याप्यन्यस्य वा गूढचरं मन्ये। तदादेशं पालयिष्यामि प्रभुत्र्यस्या आगच दुगाध्यक्षसमोपेर् , स एवा भिज्ञाय त्वया सह यथो चि त व्यवहारष्यात।
**संन्यासीः** त्यज! नाहं पुनरायास्यामि । दयस्व, दयस्व!
प्रश्ना: (i) संन्यासी कम् उत्कोचं दातुम् इच्छति ?
(ii) दौवारिकः कस्य आदेश पालयति ?
(iii) दौवारिकः कम् दुगाध्यक्षसमीपे नेतुम् इच्छति ?

27 कस्यचिदेकस्य पाठस्य सारांशं पञ्चवाक्येषु लिखत : 1x5=5

(i) प्रेरणा
(ii) त्याज्यं न धैर्यम्
(iii) कर्त्तव्यनिष्ठा

## खण्ड :- ख

## अनुप्रयुक्त व्याकरणम्

28 अधोलिखितानां वर्णानाम् उच्चारणस्थानानि लिखत – 1/2x4=2

ष्, ह्, स्, म्

29 रेखाङ्कितपदेषु सन्धिच्छेदं कृत्वा नाम लिखत- 1+1=2

(i) अत्रागत्य
(ii) अस्माभिरन्वेषितः

30 संधि कुरुत- 1x3=3

(i) ससंतोषः + तथा
(ii) प्रात: + उत्थानम
(iii) सर्व + इन्द्रियाणि

31 रेखांकितपदयोः कौ मूलधातू क: च लकार: ? 1+1=2

(i) अरक्षितं तिष्ठति ।
(ii) मत्स्य संक्षयं करिष्याम:।

32 रिक्तस्थानेषु अङ्कानां स्थाने संख्यावाचकपदानि लिखत- 1x3=3

(i) _10_ बालिका: ।
(ii) _2_ चटके ।
(iii) _3_ पचिका: ।

33 आतुरस्य च किम् मित्रं इति रेखाङ्कितपदयोः कः मूलशब्दः का च विभक्तिः ?
1+1=2

34 रेखाङ्कितपदयोः कः धातुः कश्चलकारः ? 1+1=2

(i) सः विद्यालयम् आगच्छति|
(ii) सन्तापम् हरति |

35 अधोलिखितयोः समस्तपदयोः विग्रहं लिखत - 1+1=2

(i) अहिंसा
(ii) दैत्यराजेन

36 रेखाङ्कितशब्दयोः उपसर्ग-प्रत्ययौ चित्वा पृथक् कुरुत- 1+1=2

(i) प्रेषितः
(ii) प्रसादयितुम ।

37 रिक्तस्थानपूर्तिं कुरुत- 1x3=3

(क) ______गंगा प्रभवति। ( हिमालय )
(ख) सः_______खल्वाटः । ( शिरम्)
(ग) हरिः_______ अधिवसति। ( वैकुण्ठ )

38 रिक्तस्थाने किं पदं भविष्यति ? 1+1=2

(i) शुद्धानि वस्त्राणि ______पांसुरभूमिम् । (त्यज् + क्त्वा)
(ii)अहम् भोजनं ________विद्यालयं गच्छामि। (कृ + कत्वा)

## खण्ड – ग

## रचनाकौशलम्

39 अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नान् उत्तरत – 1X5=5

दीपावलीपर्व भारतीयानाम् प्रमुखं पर्व विद्येत। अस्मिन् दिवसे श्रीरामः पितुः आज्ञा पालयन् चतुर्दशवर्षाणि वने उषित्वा रावणं हत्वा, स्वपत्नीं सीतां च विमोच्य अयोध्यानगरी परावृत्तः आसीत् । तस्मादेव कालात् भारतीयाः प्रति वर्ष कार्तिक अमावास्यायां स्वगृहेषु दीपान् प्रज्वालयन्ति । अस्मिन्नेव दिवसे रात्रौ महालक्ष्मीपूजनं क्रियते । अस्मात् पर्वणः पूर्वं जनाः स्वगृहाणां शुद्धिं कुर्वन्ति , गृहाणि च सज्जयन्ति ।

प्रश्ना :

(1) दीपावल्यां रात्रौ किम् क्रियते ?

(2) दीपावली केषां प्रमुखं पर्व अस्ति ?

(3) दीपावली कस्मिन् दिने भवति ?

(4) 'पर्वणः' इति पदे कवि भक्तिः ?

(5) 'स्वपत्नी सीता' अनयोः पदयों विशेषणपदं किम् ?

40 अधोलिखितं विषयमधिकृत्य मञ्जूषापदसहायतया पञ्चवाक्येषु एकमनुच्छेदं लिखत-
5

**"स्वच्छता अभियानम्"**

**मञ्जूषा**

| |
|---|
| स्वास्थ्याय, आवश्यकं , भवेत्, स्वच्छता, वातावरणं शरीरस्य, परिसरस्य, अभियानं. सर्वे मिलिता, स्वस्थंमनः, आत्मा, सुखमयं, आनंददायकं रोग निवारकम |

41 भवान् सुरेशः, छात्रावासे निवसति । आगरास्थं ताजभवनं द्रष्टुं 1X5=5
शैक्षिकभ्रमणाय गन्तुं भवान् इच्छति । तदर्थं धन प्रेषणाय पितरं प्रति लिखितं पत्रं मंजूषायां प्रदत्तैः शब्दैः रिक्तस्थानानि पूरयत-

विद्यालय छात्रावास:
प्रयागनगरम्
परमादरणीयाः पितृमहोदयाः,
सादरं प्रणामा मि ।
सविनयं (i).................यत् मम अ र्द्धवार्षिकी परीक्षा समाप्ताजाता। मम परीक्षा
(ii)........................अग्रिमे अवकाशे अहं गृहं न (iii)................... । तत्र कारणम् अ स्ति
यत् वि द्यालयेन एकस्य (iv)....................आयोजनं कृ तम् । एषा यात्रा आगरास्थ
ताजभवनं द्रष्टुम् आयो जि ता व र्तते । अतः तत्र व्यया र्थपंचशतं (v).................. भवन्तः
प्रेषयन्तु । सवेभ्र्यः मम प्रणामाः।
भवतां प्रि य पुत्रः
सुरेशः

| मञ्जूषा |
|---|
| शोभना, निवेदनम्, आगमिष्यामि , शैक्षिकभ्रमणस्य, रुप्यकाणि , प्रणामाः |

42 अधोलिखितं चित्रं दृष्ट्वा पञ्च वाक्येषु वर्णनं कुरुत – 1x5=5




**मञ्जूषा**

| |
|---|
| रेलयानम्, रेलस्थानकम्, यात्रिणः, आरोहन्ति , अवरोहन्ति , भारवाहका, नयन्ति , भारम्। |

# SANSKRIT PAPER 5

# संस्कृतम्

# (209)

**समय : होरात्रयम् ]** **[पूर्णाङ्का: - 100**

---

निर्देशा : (1) अस्मिन् प्रश्नपत्रे द्विचत्वारिंशत् प्रश्नाः।

(2) प्रत्येकं प्रश्नस्य समक्षम् अङ्काः सूचिताः।

(3) सर्वे प्रश्ना: अनिवार्याः।

---

## खण्ड – क

1. वयं कस्याः पुत्राः ? 1x10=10

(A) पृथिव्या: (B) आकाशः
(C) पाताल : D) सर्वः

2. कीर्तिः केन प्राप्यते ?

(A) भूमिदानेन (B) यज्ञदानेन
(C) धन दानेन (D) सर्वस्व दानेन

3. जीवनं ..... जलाशय सुनिर्भरम् ।

(A) अल्पजनानां (B) सर्व प्राणिनां
(C) मादकानां (D) पादपानां

4 दया कः याचते ?

(A) संन्यासी (B) दौवारिकः
(C) शिववीर : (D) सर्वे

5 कः पुरुषः जीवने सम्मानं प्राप्नोति ?

(A ) शत्रुः (B) दुश्चरित्रः

(C) कर्तव्यनिष्ठ (D) लालसा युक्त जन :

6 वयं रसायन तत्वं विद्धः ?

(A) कार्य कुर्मः (B) जानीमः

(C) वन्दनं कुर्मः (D) लेखनं कुर्मः

7 तुभ्यम् इति शब्दः कः विभक्ति ?

(A) द्वितीया विभक्ति (B) चतुर्थी विभक्ति

(C) चतुर्थी विभक्ति (D) सप्तमी विभक्ति

8 ईशम् कथं भुवं सृजति ?

(A) स्व लीलया (B) मलिनवपुः

(C) कठिनाम् (D) धूसरितं

9 जीवनः कः महत्वपूर्णः अस्ति ?

(A) श्रमः (B) धनः

(C) तृष्णा (D) दर्पः

10 भोजन मध्ये ........... वारि।

(A) अमृतं (B) विषं

(C) तक्रं (D) पयः

11 सात्विकेभ्यः पुरुषेभ्यः कीदृशः आहारः रोचते ? 1+1= 2

12 अस्माभिः कीदृशं भोजनं कर्त्तव्यम् ? 1+1= 2

13 (i) चन्द्रकेतुः कस्य कृते दर्पनिकषः अस्ति ? 1+1= 2

(ii) लोहितं छीवनं वा कुत्र न समुत्सृजेत्?

14 अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नान् उत्तरत – 1x3=3

**चन्द्रकेतुः**- भो भो राजानः! असंख्यातैः द्विरद-तुरग-स्यन्दनस्थैः भवद्भिः कवचावृत्तैः एक स्मि न् पदातौ युगपत् यत् युद्धं प्रारब्धं तद्वः धिग् अस्मान् च धिक् ।

**लवः**- (सोन्माथम्) आः कथम् अनुकम्पते नाम? (ससम्भ्रमं वि चि न्त्य) भवतु जृम्भकास्त्रेण तावत् सैन्यानिसंस्तम्भयामि । (इति नाट्येन मुञ्चति )

**सुमन्त्रः**- अये! किमिदानीम् सैन्यघोषाः प्रशान्ताः! वत्स! मन्ये कु मारेण जृम्भकास्त्रं प्रयुक्तमिति ।

**चन्द्रकेतुः**- अत्र कः सन्देहः! पश्यतु सैन्यम् चित्र लिखितमि व अस्पन्दम् आस्ते। अतोऽजितवी र्य जृम्भकास्त्रमेवेदम्॥।

**सुमन्त्रः**- कुतः पुनरस्य जृम्भकस्य प्राप्तिः?

**चन्द्रकेतुः**- भगवतः प्राचेतसादिति मन्यामहे।

(i) जृम्भकास्त्र केन प्रयुक्तम् ?

(ii) सैन्यम् किम् इव अस्पन्दम् आसीत् ?

(iii) कुत्र सन्देहः नास्ति ?

15 कस्यचिदेकस्य चरित्रचित्रणं पञ्चवाक्येषु संस्कृतेन कुरुत - 1x5=5

लवः **अथवा** दौवारिकः

16 जम्बुवृक्षस्य द्वे विशेषणे लिखत। 2

17 (क) दशरथस्य राजधानी का आसीत्? 1+1=2

(ख) कस्मिन् पर्वते रामः सुग्रीवेण सह अमिलत्?

18 अधोलिखितं पद्यं पठित्वा प्रशनान् उत्तरत – 1+1=2

एषा गोदावरी रम्या , प्रसन्नसलिला शुभा।
अगस्त्यस्याश्रमश्चैव, दृश्यते कदलीवृतः ।।

(i) प्रसन्नसलिला का आसीत्?

(ii) अगस्त्यस्य आश्रमः कीदृशैः वृक्षैः वृतः आसीत्?

19 अधोलिखितं पद्यं पठित्वा प्रश्नान् उत्तरत – 1+1=2

किमिच्छन्ति नराः काश्यां भूपानां को रणे हितः।
को वन्द्यः सर्वदेवानां दीयतामेकमुत्तरम्।॥

(i) जना: काश्यां किमिच्छन्ति ?

(ii) युद्धे राज्ञां हितकरं किम् ?

20 अधोलिखितं पद्यांशं पठित्वा प्रश्नान् उतरत- 1X3=3

क्रोधः सुदुर्जयः शत्रुर्लोभो व्याधिरनन्तकः।
सर्वभूतहितः साधुरसाधु निर्दयः स्मृतः। ॥

(i) अनन्तक: व्याधि : क: अस्ति ?

(ii) साधु: कीदृश: भवति ?

(iii) 'स्मृतः' इति शब्दे क: प्रत्यय: ?

21 अधोलिखित श्लोकस्य अन्वये रिक्तस्थानि पूरयत- 1x3=3

किंस्वद् गुरुतरं भूमेः किंस्वदुच्चतरं च खात्।
किस्विच्छीघ्रतरं वायोः किंस्वद् बहुतरं तृणात्।।

**अन्वयः-**

भूमेः गुरुतरम् किंस्वद्, <u>1</u> च उच्चतरम् किंस्वद्, <u>2</u> शीघ्रतरम् किस्वित्, किंस्वद् (च) <u>3</u> बहुतरम् (अ स्ति ) ।

22 रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कुरुत – 1+1=2

(क) **<u>ग्रहाणां</u>** स्वप्रकाशता नास्ति |

(ख) सः **<u>गणितस्य</u>** जटिलप्रश्नान् स्पष्टीकृतवान्।

23 क: कं प्रति कथयति? 1+1=2

(क) परिरक्ष सम्यक् गरुडनीडानि।

(ख) निवर्तस्व तावत् ।

24 किमिच्छन्ति नराः काश्यां भूपानां को रणे हितः। 1+1=2
को वन्द्यः सर्वदेवानां दीयतामेकमुत्तरम्।॥

(i) जना: काश्यां किमिच्छन्ति ?

(ii) युद्धे राज्ञां हितकरं किम् ?

25 अधोलिखित गद्यांशं पठित्वा प्रश्नान् उत्तरत – 1x3=3

आसीत् समुद्रसमीपे वि शाल: फलैः पूरितः जम्बुवृक्षः। तस्मिन् वृक्षे बलिष्ठो रक्तमुखनामकः वानरः वसति स्म। एकदा करालमुखः नामको मकर: वानरम् अपश्यत् अचिन्तयत् च यत् अयं वृक्षवासी स्वस्थ: चञ्चल: निर्भीक : इव प्रतिभाति । अयं मम सहचरो भवतु इति मत्वा प्रतिदिनं सस्नेहं वार्ता करोति । वानरः अपि कथयति यत् भवान् मम अतिथि :। भक्षयतु मधुराणि जम्बुफलानि|

प्रश्नाः

(क) समुद्रतीरे फलै: पूरित: क: वृक्ष: आसीत्?

(ख) भवान् मम अतिथि : इति क: कथयति ?

(ग) रक्तमुखनामक: वानरः <u>वसति</u> स्म इत्यत्र रेखांकितपदे क: लकार:?

26 अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नान् उत्तरत- 1x3=3

एतत् श्रुत्वा प्रथमं वाक् शरीरात् निर्गता। सा वर्ष यावत् प्रोष्य प्रत्यागता अपृच्छत् - कथं भवखि : मया विना जीवितम्?' प्राणादयः अवदन् यथा मूकाः वाचा अवदतः अपि , प्राणेन श्वसन्तः, चक्षुषा पश्यन्तः, श्रोत्रेण शृण्वन्तः, मनसा ध्यायन्तः जीवन्ति , एवं वयम् अपि अजीवाम।' प्राविशत् हे वाक् ।

प्रश्नाः- 1) सर्वप्रथमं का शरीरात् बहि : गता?

2) प्राणादयः किम् अवदन्?

27 कस्यचिदेकस्य पाठस्य सारांशं पञ्चवाक्येषु लिखत : 1x5=5

(i) प्रेरणा
(ii) त्याज्यं न धैर्यम्
(iii) कर्त्तव्यनिष्ठा

## खण्ड : - ख
## अनुप्रयुक्त व्याकरणम्

28 अधोलिखितानां वर्णानाम् ओष्ठवर्णौ चिनुत- 1+1=2

क्, प्, द्, ब्

29 रेखाङ्कितपदेषु सन्धिच्छेदं कृत्वा नाम लिखत- 1+1=2

(i) तदाकर्ण्य

(ii) अशक्तैर्बलिनः

30 संधि कुरुत- 1x3=3

(i) शीत + उष्णम

(ii) संन्यासिन: + अपि

(iii) अद्य + अवधि

31 रेखांकितपदयोः कौ मूलधातू क: च लकार: ? 1+1=2

(i) पादपा: जिघ्रन्ति|

(ii) सर्वभूतहित: साधु: कथ्यते|

32 रिक्तस्थानेषु अङ्कानां स्थाने संख्यावाचकपदानि लिखत- 1x3=3

(i) 4 बालका: |

(ii) 5 घटा: |

(iii) 9 कूपा: |

33 दानं मरिष्यत: मित्रं इति रेखाङ्कितपदयोः क: मूलशब्दः का च विभक्तिः ? 1+1=2

34 रेखाङ्कितपदयोः कः धातुः कश्चलकारः ? 1+1=2

(i) देवानांधिप: शक्र: अभवत् |

(ii) शरीरं निर्मलं <u>भवति</u> |

35 अधोलिखितयोः समस्तपदयोः विग्रहं लिखत - 1+1=2

(i) प्रजारक्षणाय

(ii) शिवगणा:

36 रेखाङ्कितशब्दयोः उपसर्ग-प्रत्ययौ चित्वा पृथक् कुरुत- 1+1=2

(i) <u>करणीय</u>

(ii) <u>मधुरा</u>

37 रिक्तस्थानपूर्तिं कुरुत- 1x3=3

(क) _______ तापस:। ( जटा )

(ख) _______उभयतः वृक्षाः सन्ति। ( सरोवर)

(ग) कृष्ण:_______ सह नृत्यं करोति। ( राधा )

38 रिक्तस्थाने किं पदं भविष्यति ? 1+1=2

(i) अहम् विद्यालयं ______ ( आगच्छति+ क्तवतु )

(ii) राम: भोजनं _______ इच्छति। (कृ + तुमुन्)

**खण्ड – ग**

**रचनाकौशलम्**

39 अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नान् उत्तरत – 1X5=5

मिथिलायां विद्यापति नामकः महान् कवि: बभूव। स: संस्कृतस्य मैथिलीभाषायाश्च महाकवि: आसीत्। अवहट्ठ भाषायाम् अपितेन रचनाः कृताः। स: राज्ञः शिविसंहस्य मित्रम् आसीत्। नृपस्य राजसभायां सः राजकवि : आसीत्। विद्यापति : महान् शिवभक्त: आसीत्। कथ्यते यत् महादेव: तस्य भक्त्या प्रसन्नो भूत्वा तस्मैबदु वरान् अयच्छत्।

प्रश्ना :

(1) विद्यापति : कस्याः भाषायाः कवि: आसीत् ?

(2) स: कस्य नृपस्य मित्रम् आसीत् ?

(3) विद्यापति : कस्य भक्तः आसीत् ?

(4) विद्यापतये क: वरान् अयच्छत् ?

(5)'रुष्ट:' इ ति पदस्य िकं वि लोमपदमत्र प्रयुक्तम्?

40 अधोलिखितं विषयमधिकृत्य मञ्जूषापदसहायतया पञ्चवाक्येषु एकमनुच्छेदं लिखत- 5

**'वसुधैव कुटुम्बकम'**

**मञ्जूषा**

| |
|---|
| उदारचरितानां, सम्पूर्णजगत्, परिवार:, लघुचेतसां, मम, तव इति गणना, आत्मवत्, सर्वान् मनुष्यान्, परहिते निरता:, धारयन्ति , जीवनम्, वयं सवेर्, पुत्र:, एकस्य, परमात्मन:, देवा:, दानवा: । |

41 भवान् राके शः छात्रावासे जयपुर विद्यापीठे वसति । भवतः विद्यालये संस्कृत दिवसे मालविका-अग्निमित्रम् इति संस्कृतनाटकस्य मञ्चनं भविष्यति । तत्र भवान् अपि अभिनयं करिष्यति स्वपितृमहोदयान् प्रति तं प्रेक्षितुं निमन्त्रणपत्रं, मंजूषायाम् प्रदत्तैः शब्दैः रिक्तस्थानानि पूरयित्वा लिखतु। 1X5=5

जयपुर विद्यापीठ छात्रावासः
तिथि :
परमादरणीयाः पितृमहोदया

सादरं नमामि ।
अद्य अहं सादरं (1) ................. यत् विद्यालये आगामि (2) ...............संस्कृत दिवसस्य आयोजनं भविष्यति । तत्र (3) ................. नाम नाटकं प्रस्तूयते । एतास्मिन् (4) ................. अहमपि अभिनयं (5)............... भवान् मात्रा सह आगत्य अवश्यमेव पश्यन्तु ।
भवतां प्रियः पुत्रः
राके शः

| **मञ्जूषा** |
|---|
| मालविकाग्निमित्रम्, निवेदयामि ,अवसरे, मासे, करिष्यामि , दिवसस्य |

42 अधोलिखितं चित्रं दृष्ट्वा पञ्च वाक्येषु वर्णनं कुरुत – 1x5=5



**मञ्जूषा**

| |
|---|
| षष्ठी पूजनस्य, अवसरः, वृक्षस्य अधः, जनाः, बालकाः, महिलाः, स्नानं, जलमध्ये, स्थिताः, केचन, पूजां ,कुर्वन्ति , जले जनानां, छाया, पवित्रं जलं, स्वच्छम् |